GOVERNMENT OF INDIA
ARCHÆOLOGICAL SURVEY OF INDIA
CENTRAL
ARCHÆOLOGICAL
LIBRARY

ACCESSION NO 23619
CALL No. 091.4912/G.O.M.L.M.

D.G.A. 79

D2770

OFFICE OF THE DIRECTOR GENERAL OF ARCHAEOLOGY
Library Regr. No.
INDIA

D.G.
21.11.18

# A DESCRIPTIVE CATALOGUE

OF THE

# SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS
LIBRARY, MADRAS

OFFICE OF THE DIRECTOR GENERAL OF ARCHAEOLOGY
INDIA

BY

S. KUPPUSWAMI SASTRI, M.A.,

CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, AND
PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY,
PRESIDENCY COLLEGE, MADRAS.

23619

---

*Prepared under the orders of the Government of Madras.*

---

VOL. XXIII—Medicine.

091.4912
G.O.M.L.M.

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1918.

CENTRAL ARCHAEOLOGICAL
LIBRARY, NEW DELHI.
Acc. No. 23619
Date. 23. 4. 56.
Call No. 091.4491/G.O.M.L.M.

## ADDENDA AND CORRIGENDA.

| Page | Line | | |
|---|---|---|---|
| 8793 | 21 | Add 'Vaidyagrantha 90*a*, Rasādiyogagrantha 108*a*' | |
| 8824 | 2 | For 58*a* | Read 59*b* |
| 8828 | 10 | Add 'Vaidyagrantha 1*a*' | |
| " | " | For Ayurvēda 1*a* | Read Āyurvēda 4*b* |
| 8830 | 20 | " Cikitsāsārasaṅgraha | Read Vaidyacintāmaṇi |
| 8832 | 21 | Add 'Basavarājiya with Telugu meaning 21*a*' | |
| 8865 | 34 | " 'Madanavinōdananighaṇṭu 18*a*' | |
| 8867 | Last. | For परिच्छेद | Read परिच्छेदः |
| 8879 | 5 | " सामनाथ | " सोमनाथ |
| " | 7 | " यागरत्नावली | " योगरत्नावली |
| " | 9 | " तद्रसन्द्रं | " तद्रसेन्द्रं |
| 8927 | 21 | " सद्गहे | " सद्गदे |

# CONTENTS.

## CLASS XIV.—MEDICINE.

### *A.—Complete systems.*


| Name of the work. | Numbers. |
|---|---|
| Aśvinīsaṁhitā with Kanarese meaning ... ... ... ... | 13069 |
| Aṣṭāṅgasaṅgraha ... ... ... ... ... ... ... | 13070 |
| Aṣṭāṅgasaṅgrahavyākhyā ... ... ... ... ... ... | 13071 |
| Aṣṭāṅgahṛdaya ... ... ... ... ... ... ... ... | 13072 to 13075, 13077 to 13082, 13329, 13331 |
| Aṣṭāṅgahṛdaya with Telugu meaning ... ... ... ... | 13076, 13083, 13329, 1330 |
| Aṣṭāṅgahṛdayavyākhyā : Sarvāṅgasundarī ... ... ... ... | 13084, 13085 |
| Āyurvēda ... ... ... ... ... ... ... ... | 13086 to 13088, 13332, 13333 |
| Āyurvēdārthasārasya ... ... ... ... ... ... ... | 13089 |
| Carakasaṁhitā ... ... ... ... ... ... ... ... | 13090 |
| Carakasaṁhitāvyākhyā : Pañcikā ... ... ... ... ... | 13091 |
| Carakasaṁhitāvyākhyā ... ... ... ... ... ... | 13092 |
| Dvādaśārthanirūpaṇa with Tamil meaning ... ... ... | 13093 |
| Dvādaśārthanirūpaṇa ... ... ... ... ... ... ... | 13094 |
| Vaidyacintāmaṇi with Telugu meaning ... ... ... ... | 13095 to 13097, 13361, 13363 to 13374 |
| Vaidyacintāmaṇi ... ... ... ... ... ... ... | 13098, 13362 |
| Vaidyaśāstra with Tamil meaning ... ... ... ... ... | 13099 |
| Śāstradīpikā ... ... ... ... ... ... ... ... | 13100 |
| Suśruta ... ... ... ... ... ... ... ... ... | 13101 |


### *B.—Treatises on special subjects.*


| | |
|---|---|
| Akṣirōganirmūlana ... ... ... ... ... ... ... | 13102 |
| Auṣadhayōgagrantha with Telugu meaning ... ... ... | 13103, 13104, 13106, 13107, 13109 to 13111, 13335 |
| Auṣadhayōgagrantha with Tamil meaning ... ... ... ... | 13105 |
| Auṣadhayōgagrantha ... ... ... ... ... ... ... | 13108 |
| Kāśyapīyarōganidāna ... ... ... ... ... ... ... | 13112 |
| Kailāsahāraka ... ... ... ... ... ... ... ... | 13113 |
| Gadāsañjīvanī ... ... ... ... ... ... ... ... | 13114 |
| Gadāsañjīvanī with Telugu meaning ... ... ... ... | 13115 to 13117 |
| Cikitsāgrantha with Kanarese meaning ... ... ... ... | 13118, 13119 |
| Cikitsāgrantha with Telugu meaning ... ... ... ... | 13120 to 13129 |
| Cikitsāgranthasāra with Telugu meaning ... ... ... ... | 13130 |
| Cikitsāviṣaya ... ... ... ... ... ... ... ... | 13131 to 13133 |
| Cikitsāviṣaya with Telugu meaning ... ... ... ... ... | 13134 to 13136 |
| Cikitsāsārasaṅgraha ... ... ... ... ... ... ... | 13137 |
| Cikitsāsārasaṅgraha with Telugu meaning ... ... ... ... | 13138 to 13144 |
| Cikitsāsārasaṅgraha with Kanarese meaning ... ... ... | 13145 |

| Name of the work. | Numbers. |
|---|---|
| Jvarauṣadha ... ... ... ... ... ... ... ... | 13146 |
| Trailōkyacintāmaṇirasanirūpaṇa with Telugu meaning ... ... | 13147 |
| Dattātrēyamata with Telugu meaning ... ... ... ... | 13148 |
| Dutādhyāya ... ... ... ... ... ... ... ... | 13149 |
| Dēhatattvanirṇaya with Telugu meaning ... ... ... ... | 13150 |
| Nāḍinidāna with Vyākhyāna ... ... ... ... ... ... | 13151 |
| Nāḍīparīkṣa with Telugu meaning ... ... ... ... ... | 13152 |
| Nāḍīlakṣaṇa ... ... ... ... ... ... ... ... | 13153 |
| Nāḍīvijñāna with Telugu meaning ... ... ... ... ... | 13154, 13342 |
| Nāḍīśāstrasaṅgraha with Telugu commentary ... ... ... | 13155 |
| Nānāvidhauṣadhakalpa with Telugu meaning ... ... ... | 13156 |
| Nidānagrantha with Telugu meaning ... ... ... ... | 13157 to 13160 |
| Nidānamuktāvali ... ... ... ... ... ... ... | 13161 to 13163 |
| Nidānayōgaratnāvali ... ... ... ... ... ... ... | 13164 |
| Nidānayōgaratnāvali with Telugu meaning ... ... ... | 13165 |
| Nidānaviṣaya ... ... ... ... ... ... ... ... | 13166, 13344 |
| Nṛsiṁhanidāna ... ... ... ... ... ... ... ... | 13167, 13168 |
| Pathyāpathyavivēka ... ... ... ... ... ... ... | 13169 |
| Pāradayōgaśāstra ... ... ... ... ... ... ... | 13170 |
| Prakṛtilakṣaṇa ... ... ... ... ... ... ... ... | 13171 |
| Pramēhacikitsā with Kanarese meaning ... ... ... ... | 13172 |
| Praśnōttararatnamālā ... ... ... ... ... ... ... | 13173 |
| Bālagrahacikitsā with Telugu meaning ... ... ... ... | 13174 |
| Bālacikitsā with Kanarese meaning ... ... ... ... ... | 13175 |
| Bāhaṭagrantha with Telugu meaning ... ... ... ... | 13176, 13177 |
| Bhāradvājīya ... ... ... ... ... ... ... ... | 13178 |
| Bhēṣajakalpa with commentary ... ... ... ... ... | 13179 |
| Bhēṣajakalpa with Telugu meaning ... ... ... ... ... | 13180, 13181 |
| Bhēṣajakalpavyākhyā ... ... ... ... ... ... ... | 13182 |
| Bhēṣajakalpasārasaṅgraha ... ... ... ... ... ... | 13183 |
| Maṇḍūkabrahmīkalpa ... ... ... ... ... ... ... | 13184 |
| Madanakāmaratna with Telugu meaning ... ... ... ... | 13185 |
| Mādhavanidāna ... ... ... ... ... ... ... | 13186 |
| Mādhavanidāna with Telugu meaning ... ... ... ... | 13187 |
| Yakṣmarōganidāna ... ... ... ... ... ... ... | 13188 |
| Raktapittādinidānacikitsā with Telugu meaning ... ... ... | 13189 |
| Ratnākarauṣadhayōgagrantha ... ... ... ... ... | 13190 |
| Ratnākarādyauṣadhayōgagrantha ... ... ... ... ... | 13191 |
| Rasakacchapuṭa with Telugu meaning ... ... ... ... | 13192 |
| Rasakaumudī ... ... ... ... ... ... ... ... | 13193 |
| Rasagrantha ... ... ... ... ... ... ... ... | 13194 |
| Rasabhēṣajakalpadīpikā ... ... ... ... ... ... | 13195 |
| Rasarañjana ... ... ... ... ... ... ... ... | 13196, 13197 |
| Rasaratnasamuccaya ... ... ... ... ... ... ... | 13198 |
| Rasaratnākara ... ... ... ... ... ... ... ... | 13199 to 13203, 13206 |
| Rasaratnākara with Telugu meaning ... ... ... ... | 13204, 13205 |
| Rasasārasaṅgraha with Kanarese meaning ... ... ... | 13207 |
| Rasasārasamuccaya ... ... ... ... ... ... ... | 13208 |

| Name of the work. | Numbers. |
| --- | --- |
| Rasārṇava | 13209 |
| Rasēndracūḍāmaṇi | 13210 |
| Rahasyauṣadha | 13211 |
| Rudantīkalpa | 13212 |
| Rudantyādikalpa | 13213 |
| Rōganiścaya with Telugu meaning | 13214 |
| Rōgasaṅkhyānidāna | 13215, 13216 |
| Rōgōtpattipāpacikitsāviṣaya with Kanarese meaning | 13217 |
| Vaidyagrantha | 13218, 13358, 13359 |
| Vaidyagrantha with Telugu meaning | 13219 to 13224, 13360 |
| Vaidyayōgasaṅgraha with Telugu meaning | 13225 |
| Vaidyarājatantra with Kanarese meaning | 13226 |
| Vaidyaviṣaya | 13227 to 13229 |
| Vaidyaviṣaya with Telugu meaning | 13230 to 13234, 13237, 13375, 13376 |
| Vaidyaviṣaya with Kanarese meaning | 13235, 13236 |
| Vaidyaviṣayagrantha with Telugu meaning | 13238 |
| Vaidyasārasaṅgraha | 13239, 13241 |
| Vaidyasārasaṅgraha with Kanarese meaning | 13240 |
| Vraṇacikitsāgrantha | 13242 |
| Śāstra | 13243 |
| Sakalarōgacikitsāgrantha with Telugu meaning | 13244 |
| Sadvaidyajīvana | 13245, 13247 |
| Sadvaidyajīvana with Telugu meaning | 13246 |
| Sannipātacandrikā with the commentary Padacandrikā | 13248 |
| Sannipātādirōganidāna | 13249 |
| Sārasvataghṛtādiyōga with Telugu meaning | 13250 |
| Siddhayōga | 13251 |
| Siddhasārasaṃhitā | 13252 |
| Sūtapradīpikā | 13253 |


## C.—*Materia Medica.*


| Name of the work. | Numbers. |
| --- | --- |
| Abhidhānacūḍāmaṇi | 13254, 13255 |
| Aṣṭāṅganighaṇṭu with Telugu meaning | 13256 |
| Abhidhānaratnamālā | 13257, 13262 |
| Abhidhānaratnamālā with Kanarese meaning | 13258 |
| Abhidhānaratnamālā with Telugu meaning | 13259 to 13261 |
| Guṇapāṭha | 13263 to 13266 |
| Cārucaryā | 13267 to 13269 |
| Dakṣiṇāmūrtinighaṇṭu | 13270 |
| Dēhalakṣaṇa | 13271 |
| Dravyaguṇapāṭha | 13272, 13274 to 13276 |
| Dravyaguṇapāṭha with Telugu meaning | 13273 |
| Dravyaguṇasaṅgraha | 13277 |
| Dravyaniścayasārasaṅgraha with Telugu meaning | 13278 |
| Dravyaniścayasārasaṅgrahaguṇapāṭha | 13279 |
| Dravyaratnāvalī | 13280, 13281 |
| Dravyavaiśēṣika | 13282 |

| Name of the work. | Numbers. |
| --- | --- |
| Dhanvantarinighaṇṭu ... | 13283 to 13285, 13287, 13290, 13291, 13294 |
| Dhanvantarinighaṇṭu with Telugu meaning | 13286, 13288, 13289, 13292 |
| Dhanvantarinighaṇṭu with Tamil meaning | 13293 |
| Pathyāpathyavarga with Telugu meaning | 13295 |
| Bhōjanakutūhala | 13296 to 13298 |
| Madananighaṇṭu | 13299 |
| Rasanighaṇṭu | 13300, 13301 |
| Vastuguṇakalpavallī with Telugu meaning | 13302, 13303 |
| Vastuguṇanirṇaya with Telugu meaning | 13304 |
| Vaidyanighaṇṭu with Telugu meaning | 13305 |
| Vaidyanighaṇṭu | 13306 |
| Śataślōkī with Telugu meaning | 13307 to 13311 |
| Śataślōkī | 13312, 13313 |
| Śatasandhānī | 13314 |
| Sārasaṅgraha with Tamil meaning ... | 13315 |
| Harītakībhēda with Telugu meaning | 13316 |


*D.—Veterinary, etc.*


| | |
| --- | --- |
| Aśvapraśaṁsā ... | 13317 |
| Aśvalakṣaṇaśāstra with Telugu meaning | 13318 |
| Aśvāyurvēda | 13319, 13321 to 13323 |
| Aśvāyurvēda with Kanarese meaning | 13320 |
| Mātaṅgalīlā | 13324 |
| Mātaṅgalīlā with Malayālam meaning | 13325, 13326 |
| Mānapriyamata ... | 13327 |


*Medicine—Supplement.*


| | |
| --- | --- |
| Āyurvēda with Telugu meaning | 13334 |
| Kṣayarōganidāna | 13336 |
| Gandhakakalpa | 13337 |
| Cikitsātilaka ... | 13338 |
| Cūrṇalōhyakrama | 13339 |
| Jīrṇakālapramāṇa with Telugu meaning | 13340 |
| Nāḍīcakravidhi | 13341 |
| Nāḍīśāstra | 13343 |
| Nidānaviṣaya with Telugu meaning ... | 13345 |
| Parahitasaṁhitā | 13346 |
| Basavarājīya with Telugu meaning ... | 13347 to 13350, 13352, 13353 |
| Basavarājīya | 13351 |
| Bhēṣajakalpa | 13354 |
| Madanavinōdananighaṇṭu | 13355 |
| Rasādiyōgagrantha with Telugu meaning ... | 13356 |
| Viṣavaidya with Telugu meaning | 13357 |
| Vaidyaśāstra with Telugu meaning ... | 13377 |
| Śatayōgagrantha with Telugu meaning | 13378 |
| Siddhamantra with the commentary Prakāśa | 13379 |
| Sindūraviṣaya with Telugu meaning | 13380 |
| Sōpaśāstra with Kanarese meaning | 13381 |

# A DESCRIPTIVE CATALOGUE
OF THE
# SANSKRIT MANUSCRIPTS
## VOLUME XXIII

## CLASS XIV.—MEDICINE.
### (A) COMPLETE SYSTEMS.

### No. 13069. अश्विनीसंहिता, कर्णाटकटीकासहिता.
### AŚVINĪSAMHITĀ WITH KANARESE MEANING.

Substance, palm-leaf. Size, 18 × 1⅝ inches. Pages, 30. Lines, 11 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Wants the beginning and the end.

A treatise on medicine said to have been revealed by the celestial twin brothers Aśvins. Contains Kanarese meaning for the stanzas.

**Beginning:**

अश्वगन्धा वचा कुष्ठं गजपिप्पलिका समम् ।
महिषीनवनीतेन लेपात्कर्णं विवर्धते ॥
गुञ्जामूलं फलं चूर्णं महिषीक्षीरसंयुतम् ।
प्रातर्दधि ततः कुर्यात् नवनीतं तदुत्थितम् ॥
कर्णयोर्लेपनं योज्यं वर्धते नात्र संशयः ।
वराहोत्थेन तैलेन लेपात्कर्णं विवर्धते ॥

* * * *

परमायुरिति प्रोक्तं म्रियते तत्क्षणादपि ॥

**Colophon:**

इत्यश्विनीसंहितायां सन्निपातप्रकरणम् ॥

**End:**

उपक्षेपस्ततो दाहः देहे तिष्ठन् मदात्ययम् ।
विषमं वा ज्वरं कुर्यात् मृत्युं व्यापदमेव च ॥

### No. 13070. अष्टाङ्गसङ्ग्रहः.
### AṢṬĀṄGASAṄGRAHAḤ.

Substance, palm-leaf (Śrītāla). Size, 20¾ × 2 inches. Pages, 122. Lines, 9 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Contains 15 stanzas of the 4th Adhyāya, some stanzas of the 1st Adhyāya, and from the 4th Adhyāya to the 37th Adhyāya excepting

Adhyāyas 6 and 7, and breaks off in the 38th Adhyāya of the Sūtrasthāna.

A treatise on medicine in six Sthānas. The author is Vāgbhaṭa. The scope of this treatise is the same as that of Aṣṭāṅgahṛdaya which is considered by some to have been based upon this work.

**Beginning:**

गद्यवाहटप्रस्तावः ऋतुचर्यायाम्—कालो हि नाम भगवाननादिनिधनः यथोपचितकर्मानुसारी . . . . . . . . . . तथा विपरिणमन्तो जन्मवतां जन्ममरणस्य ऋतुरसवीर्यदोषदेहबलसम्पद्व्यापत्सम्पदां च प्रत्ययतां प्रतिपद्यन्ते ।

* * * *

धूमधूम्ररजोमन्दस्तुषाराविलमण्डलाः ।
दिगादित्यामरुच्छैत्यादुत्तरो रोमहर्षणः ॥

अथ रोगोत्पत्तिस्थानं प्रथमम्—

वायुः पित्तं कफश्चेति त्रयो दोषास्समासतः ।
प्रत्येकं ते त्रिधा वृद्धिक्षयसाम्यविभेदतः ॥
उत्कृष्टमध्याल्पतया त्रिधा वृद्धिक्षयावपि ।

* * * *

धीधैर्यात्मादिविज्ञानं मनोदोषौषधं परम् ॥

अथ रोगानुत्पादनीयाध्यायं व्याख्यास्यामः—

वेगान्न धारयेद्वातविण्मूत्रक्षवतृट्क्षुधान् ।
निद्राकासश्रमश्वासजृम्भाश्रुच्छर्दिरेतसाम् ॥

**End:**

अथातः शस्त्रकर्मविनिमध्यायं व्याख्यास्याम इति । द्विविधेऽपि हि व्याधा-नुपायापेक्षे निज आगन्तौ वा भेषजविषयातीते शस्त्रकर्म प्रयुज्यते ।

* * * *

समानीतशालिषष्टिकयवगोधूमान्यतमं मुद्गमसूराढकीसतीनयूषजाङ्गलरसोपेतं जीवन्तीसुनिषण्णतण्डुलीयकवास्तुक ।

---

No. **13071.** अष्टाङ्गसङ्ग्रहव्याख्या.

ASṬĀṄGASAṄGRAHAVYĀKHYĀ.

Substance, Śrītāla. Size, $21\frac{1}{4} \times 2$ inches. Pages, 161. Lines, 11 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 77a. The other work herein is Carakasaṃhitāvyākhyā 1a.

Incomplete, wants the beginning.

A commentary on the Aṣṭāṅgasaṅgraha described above. Reference is herein made to the commentary on the Carakasaṃhitā by Hariścandra. As there are very many gaps in almost every line of the work and as there are numerous scribe's errors it is difficult to identify completely the portion contained in the work.

**Beginning:**

वातोत्कर्षेण क्रूरः पित्तोत्कर्षेण मृदुः श्लेष्मोत्कर्षेण मध्यसमदोषैश्च मध्यमश्च स्यादित्यवादीत् ।

*　　*　　*　　*

हरिश्चन्द्रकृतां व्याख्यां विना चरकसंमतम् ।
यस्तृणोत्यकृतप्रज्ञः बातुमीहति सोऽम्बुधिम् ॥

*　　*　　*　　*

आयुर्वेदवाङ्मयं शिष्योपाध्यायकेन लोकेऽनासादितसूत्ररत्नाकरं . . . . . . . आलोकयितुमपि न पार्यते । तत्र च कानिचित् समुपादाय सोऽयं वाहटनामा शास्त्रकारश्च शास्त्रगर्भगौरववशात् स्वतन्त्रं भायुक्तत्तदस्य यथा सन्निवेशादनिर्व्यूढार्थिर्व्याधिविशेषैरपि नावभासन्ते । तस्मादष्टाङ्गसंग्रहे

तत् कथमित्याह । रागेत्यादि । रागादिरोगास्सहजा इत्यवादीत् । तत्र प्रतिज्ञा विरोधः । तत् कथम् ? सहजा इत्यनुपपन्नम् , बालानां रागासम्भवात् ।

**End:**

अथातो गर्भावक्रान्तीयं शारीरं व्याख्यास्याम इत्यत्र शुक्रशोणितानुप्रविष्टस्य . . . . . . . स्थायां गर्भसंज्ञा ।

क्रमीव क्रान्तेः पूर्वं गर्भस्य शरीरसंज्ञा । अत्र यदाहुः—

तेजो यथार्करश्मीनां स्फटिकेन तिरस्कृतम् ।
नेन्धनं दृश्यते गच्छेत् सत्त्वो गर्भाशयस्तथा ॥

*　　*　　*　　*

कर्तृक्रियाप्रवृत्तिनिमित्तस्य कार्यस्य कर्मक्लेशादीनामपि नास्य शरीरानुप्रवेशः । अशरीरिणः कर्म.

---

## No. 13072. अष्टाङ्गहृदयम्.

## AṢṬĀṄGAHṚDAYAM.

Substance, palm-leaf (Śrītāla). Size, 13¾ × 1¾ inches. Pages, 688. Lines, 9 on a page. Character, Malayālam. Condition, good. Appearance, old.

Complete.

A well-known work on medical science; by Vāgbhaṭa, son of Vaidyapati Siṁhagupta. According to a stanza in the Uttarasthāna of the Aṣṭāṅgasaṅgraha of Vāgbhaṭa, he was the grandson of Vāgbhaṭa and was born in the Sindhu country. There is difference of opinion as to whether he was a Brahman or a Bauddha. The work is so called because it deals with eight topics or eight classes of treatment of diseases as may be evident from the fifth stanza thereof. The work is divided into the following six Sthānas:—

| | |
|---|---|
| १. सूत्रस्थान. | ४. चिकित्सास्थान. |
| २. शारीरस्थान. | ५. कल्पस्थान. |
| ३. निदानस्थान. | ६. उत्तरस्थान. |

The work has been printed with the commentary Sarvāṅgasundarī of Aruṇadatta in the Nirṇayasāgara Press.

**Beginning:**

रागादिरोगान् सततानुषक्तानशेषकायप्रसृतानशेषान् ।
औत्सुक्यमोहारतिदान् जघान योऽपूर्ववैद्याय नमोऽस्तु तस्मै ॥

अथात आयुष्कामीयं नामाध्यायं व्याख्यास्यामः – इति ह स्माहुः आत्रेयादयो महर्षयः ।

आयुष्कामयमानेन धर्मार्थसुखसाधनम् ।
आयुर्वेदोपदेशेषु विधेयः परमादरः ॥
ब्रह्मा स्मृत्वायुषो वेदं प्रजापतिमजिग्रहत् ।
सोऽश्विनौ तौ सहस्राक्षं सोऽत्रिपुत्रादिकान् मुनीन् ॥
तेऽग्निवेशादिकांस्ते तु पृथक् तन्त्राणि तेनिरे ।
तेभ्योऽत्र विप्रकीर्णेभ्यः प्रायस्सारतरोच्चयः ॥
क्रियतेऽष्टाङ्गहृदयं नातिसङ्क्षेपविस्तरम् ।
कायबालग्रहोर्ध्वाङ्गशल्यदंष्ट्राजरावृषान् ॥
अष्टावङ्गानि तस्याहुश्चिकित्सा येषु संश्रिता ।
वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः ॥
विकृताविकृता देहं घ्नन्ति ते वर्तयन्ति च ।

* * * *

समाप्यते स्थानमिदं हृदयस्य रहस्यवत् ।
अत्रार्थाः सूत्रिताः सूक्ष्माः प्रतन्यन्ते हि सर्वतः ॥

**Colophon:**

इति सूत्रस्थाने त्रिंशोऽध्यायः ॥

End:

वाते पित्ते श्लेष्मशान्तौ च पथ्यं तैलं सर्पिर्माक्षिकं च क्रमेण ।
एतद्ब्रह्मा भाषते ब्रह्मजो वा का निर्मन्त्रे वक्तृभेदोक्तिशक्तिः ॥
अभिधातृवशात् किं वा द्रव्यशक्तिर्विशिष्यते ।
अतो मत्सरमुत्सृज्य माध्यस्थ्यमवलम्ब्यताम् ॥
ऋषिप्रणीते प्रीतिश्चेन्मुक्त्वा चरकसुश्रुतौ ।
भेडाद्याः किं न पठ्यन्ते तस्माद् ग्राह्यं सुभाषितम् ॥
हृदयमिव हृदयमेतत्सर्वायुर्वेदवाङ्मयपयोधेः ।
दृष्ट्वा यच्छुभमाप्तं शुभमस्तु परं ततो जगतः ॥

Colophon:

इत्युत्तरे चत्वारिंशोऽध्यायः ॥
इति वैद्यपतिसिंहगुप्तस्य सूनोर्वाहटस्य कृतावष्टाङ्गहृदयसंहितायामुत्तरं स्थानं षष्ठं समाप्तम् ॥

---

## No. 13073. अष्टाङ्गहृदयम्.

## AṢṬĀṄGAHṚDAYAM.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 190. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 67a. The other work herein is Āyurvēda 1a.

Contains the Śārīrasthāna complete, and Adhyāyas 1 to 14 (14th incomplete) of the Nidānasthāna.

Same work as the above.

---

## No. 13074. अष्टाङ्गहृदयम्.

## AṢṬĀṄGAHṚDAYAM.

Substance, palm-leaf. Size, 13⅜ × 1⅜ inches. Pages, 18. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1a. The other works herein are Parāśaryasaṁhitā 11a, Kriyākramadyōtikāvyākhyā 35a.

Contains the Śārīrasthāna which breaks off in the third Adhyāya.

Same work as the above.

---

## No. 13075. अष्टाङ्गहृदयम्.

## AṢṬĀṄGAHṚDAYAM.

Substance, palm-leaf. Size, 17⅞ × 1¼ inches. Pages, 53. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 60*a*. The other work herein is Nṛsiṁhanidāna 1*a*.

Contains the Adhyāyas one to six of the Śārīrasthāna.

Same work as the above.

---

### No. 13076. अष्टाङ्गहृदयम्, आन्ध्रटीकासहितम्.

### AṢṬĀṄGAHṚDAYAM WITH TELUGU MEANING.

Pages, 24. Lines, 22 on a page.

Begins on fol. 154*a* of the MS. described under No. 1800.

Contains the 15th Adhyāya of the Sūtrasthāna incomplete.

Same work as the above and with Telugu meaning.

---

### No. 13077. अष्टाङ्गहृदयम्.

### AṢṬĀṄGAHṚDAYAM.

Substance, palm-leaf. Size, 16⅞ × 1½ inches. Pages, 38. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 26*a*. The other works herein are Cikitsāsārasaṅgraha 1*a*, Rudantyādikalpa 16*a*, Āyurvedārthasārasya 21*a*, Vaidyayantraviṣaya 45*a*.

Contains the Adhyāyas one to six in the Śārīrasthāna.

Same work as the above.

---

### No. 13078. अष्टाङ्गहृदयम्.

### AṢṬĀṄGAHṚDAYAM.

Substance, paper. Size, 12¾ × 8¼ inches. Pages, 51. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 165*b*. The other works herein are Bhēṣajakalpa 1*a*, Vaidyaśāstra (with Tamil meaning) 83*a*, Dvādaśārthanirūpaṇa (with Tamil meaning) 141*a* and 190*b*.

Contains the Śārīrasthāna complete.

Same work as the above.

---

### No. 13079. अष्टाङ्गहृदयम्.

### AṢṬĀṄGAHṚDAYAM.

Substance, palm-leaf. Size, 11⅜ × 1¼ inches. Pages, 31. Lines, 5 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Pramōhacikitsā 18*a*.

Contains the 15th chapter of the Sūtrasthāna complete, with Kanarese Ṭīkā.

Same work as the above.

## No. 13080. अष्टाङ्गहृदयम्. AṢṬĀṄGAHṚDAYAM.

Substance, paper. Size, 13¼ × 8¼ inches. Pages, 328. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the Sūtrasthāna, the Śārīrasthāna, the Nidānasthāna and the Cikitsāsthāna (Ādhyāyas one to seven).

Same work as the above.

---

## No. 13081. अष्टाङ्गहृदयम्. AṢṬĀṄGAHṚDAYAM.

Substance, paper. Size, 12¾ × 7¾ inches. Pages, 213. Lines, 35 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the Sūtrasthāna, the Śārīrasthāna, the Nidānasthāna and the Cikitsāsthāna complete and again the Sūtrasthāna.

Same work as the above.

---

## No. 13082. अष्टाङ्गहृदयम्. AṢṬĀṄGAHṚDAYAM.

Substance, palm-leaf. Size, 18¾ × 1¾ inches. Pages, 101. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Rōgasaṅkhyānidāna 52*a*, Vaidyasaṅgraha 71*a*, Chāyāpuruṣalakṣaṇa 80*b*, Svasthāriṣṭanidāna 81*a*, Nāḍīlakṣaṇa 85*a*, Yantraprakāra 104*a*, Rasanighaṇṭu 106*b*, Nāḍīnidāna-vyākhyā 135*a*.

Contains the Adhyāyas 1 to 15, the last being without end, and 23 to 26, of which the 23rd wants the beginning and the 26th the end, in the Sūtrasthāna.

Same work as the above.

---

## No. 13083. अष्टाङ्गहृदयम्, आन्ध्रटीकासहितम्. AṢṬĀṄGAHṚDAYAM: WITH TELUGU MEANING.

Substance, palm-leaf. Size, 15¾ × 1¾ inches. Pages, 19. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 14*a*. The other works herein are Vaidyacintāmaṇi 1*a*, Nāḍīśāstra 25*a*, Śataślōkī 29*a*, Cūrṇalōhyakrama 38*a*, Dravyanighaṇṭu 44*a*.

Contains 25 stanzas in the 15th Adhyāya of the Sūtrasthāna.

Same work as the above, and with Telugu meaning.

## No. 13084. अष्टाङ्गहृदयव्याख्या — सर्वाङ्गसुन्दरी.

## AṢṬĀṄGAHṚDAYAVYĀKHYĀ : SARVĀṄGASUNDARĪ.

Substance, palm-leaf. Size, 18⅝ × 1¾ inches. Pages, 140. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Breaks off in the 29th stanza of the 2nd Adhyāya in the Sūtrasthāna.

Same work as that described under R. No. 37 of the Triennial Catalogue, Vol. I, Part I-A. By Aruṇadatta.

---

## No. 13085. अष्टाङ्गहृदयव्याख्या — सर्वाङ्गसुन्दरी.

## AṢṬĀṄGAHṚDAYAVYĀKHYĀ : SARVĀṄGASUNDARĪ.

Substance, palm-leaf (Śrītāla). Size, 21¼ × 2¼ inches. Pages, 154. Lines 10 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the Nidānasthāna from the 3rd Adhyāya to the 13th Adhyāya complete and the 14th incomplete and contains also the Cikitsāsthāna which breaks off in the 22nd Adhyāya. Wants 14 leaves in the beginning.

Same work as the above.

**Beginning :**

यथा भृशो निस्तु(ष्णा)दीन्यतिशयेन पित्तं रक्तं च कोपयति न तथान्यानि व्रीहिप्रभृतीन्यत एव कोद्रवोद्दालकौ शीतवीर्यावपि भृशोष्णादिद्रव्ययुक्तपित्तस्य कर्तारौ भवतः

* * * *

तस्मात्तं कासं त्वरया शीघ्रमेव ह्रि(ज)येत् । आदिशब्देनात्र पीनसादयो यक्ष्मनिदानोक्ता दृश्यन्ते ॥

**Colophon :**

इति निदानस्थाने तृतीयोपदेशः(ऽध्यायः) ॥

* * * *

तथा प्रकर्षेणातिशयेन क्लिन्नास्तथा शवगन्धयः कुणपगन्धतुल्याः तेऽप्यसाध्याः । शवस्येव गन्धो येषामिति उपमानाञ्चेत्यना(तीदा)देशः ।

**Colophon :**

इति निदाने त्रयोदशोऽध्यायः ॥

विसर्पनिदानानन्तरं तुल्यहेतुत्वात् कुष्ठनिदानमारभ्यते ।

* * * *

एके बाह्याः केशवस्त्रादिजाः यूकालिक्षादयः । अन्ये चान्तरा यथान्त्रत इत्यादयः । तम(जन्म)भेदेन चतुःप्रकाराः कथमित्याह— बहिरित्यादि । बहिर्मलजन्मानः ।

अथेदानीं चिकित्सितस्थानारम्भः । तस्य चायं सम्बन्धः रोगपरीक्षानिदानस्थाने निगदिता । साम्प्रतं चिकित्सा वक्तुं युक्ता ।

**End:**

अथवा पित्त रूपं दर्शयेत् । तं कफपित्तं वा वस्तिभिर्विवर्जयेत् ।

**Colophon:**

इत्येकविंशोऽध्यायः ॥

* * * *

यष्टिमध्वादिभिः परिषे(षृतेन क्षीरे)ण हितः पञ्चमूलकाथेनैव शीतो हितो हिमजलेन वा . . . . . . . तेवयान्नादः या हिताः कफपित्ताभ्यां संसृष्टे सति प्राकृतं विनिर्जयेत् । रक्तसंसृष्टमरुचिं वात.

---

## No. 13086. आयुर्वेदः.

## ĀYURVĒDAḤ.

Substance, paper. Size, 10⅞ × 1¼ inches. Pages, 11. Lines, 24 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Gadasañjīvana 7*a*, Auṣadhayōgādikamulu 38*a*, Bhiṣaksāramu 80*a*, Bāhaṭa (with Telugu meaning) 84*a*, Vraṇacikitsā 122*b*.

Incomplete.

A treatise purporting to give the symptoms, the diagnosis and the treatment of diseases. The science of Āyurvēda is here stated to be an appendage of the Ṛgvēda and to have been revealed by God Parama-Śiva to Goddess Pārvatī.

**Beginning:**

कैलासशिखरे रम्ये पार्वतीपरमेश्वरौ ।
अन्योन्यसुखलीलायां प्रमथादिमहागणे ॥

मृदङ्गपणवुखं चैव तालं चाजगजाननैः ।
नाट्यं च भृङ्गी नन्दी च दृष्ट्वा प्रीत्यातिशङ्करैः ॥

देवदेव महादेव सर्वज्ञ सकलेश्वर ।
आदिमध्यान्तरहित मम प्राणाहि(ति)वल्लभ ॥

सर्वतत्त्वार्थविस्तारैर्बोद्धुं श्रोतुं ममार्हसि ।
कश्चिद्गोप्यमिदं तत्त्वं सर्वलोकोपकारणम् ॥

पूर्वं विष्णुकृतं विश्वं निर्मितं च तथा क्रमम् ।
मोहितं सर्वभूतानां स्थावरं जङ्गमात्मकम् ॥

भूगोलपिण्डगोलं च ब्रह्मनिर्माणलक्षणम् ।
उत्पत्तिस्थितिसंहारं त्वया प्रसादसर्वेश: ॥
श्रोतुमानन्ददेवेश कश्चिद्रोप्यमिदं शृणु ।
विद्याविद . . तं हेतुमविद्यामायतक्रमम् ॥
किंविधं पापहेतूनां किं पापं व्याधिरूपकम् ।
किं व्याधिर्मरणे हेतुः मरणं नरकं तथा ॥
किंविधं नरकं तत्र सर्वजन्तुसमाश्रितम् ।
ऋग्वेदाङ्ग(ङ्गं वे)दरूपं चायुर्वेदं च नामतः ॥
तत्त्वार्थं श्रोतुमिच्छामि करामलकसन्निभम् ।

* * * *

सर्वभूतहितं गोप्यं ऋग्वे(वे)दाङ्ग(ङ्गं वे)दरूपकम् ।
आयुर्वेदमिदं नाम सर्वजन्तु(न्तो)श्च जीवनम् ॥
. . . . . . . सङ्क्षेपं प्रोक्तोऽयं शृणु पार्वति ।
आदानं च निदानं च चिकित्सा त्रीणि रूपकम् ॥
कालजं कर्मजं रोगत्रितयं रूपलक्षणम् ।
सर्वतन्त्रं च विविधं दर्पणं सुखमाकृति ॥

* * * *

**Colophon:**

इति व्याधिरूपं समाप्त(सम्) ॥

**End:**

चयप्रकोपप्रशमा वायोर्ग्रीष्मादिषु त्रिषु ।
वर्षादिषु च पित्तस्य श्लेष्मणः शिशिरादिषु ॥
अग्रे पैत्यगतिर्नाडी मध्ये मारुत जायते ।
अन्त्ये श्लेष्म च विज्ञेयं कोविदैः शास्त्रपारगैः ॥

---

## No. 13087. आयुर्वेदः. ĀYURVEDAḤ.

Pages, 64. Lines, 27 on a page.

Begins on fol. 1a of the MS. described under No. 1331.
Contains the Praśnas 1 to 17 complete.

Similar to the above. It is written in prose in the form of Sūtras. The work appears to be the same as that described on page 63 of Dr. Burnell's Catalogue.

**Beginning:**

अथातो धातुस्थदोषगत्यति(विकार)हेतुभूतार्थबाधिकद्रव्याण्यथात् । चिरायुरिच्छेअवृत्तिरायुर्वेदार्थपुरुषार्थोपपादिका । तद्धेतुं भूतार्थं रक्षेत । नेन्द्रिया(णि)निबला(नि) । (नेदं याति लोल)नातिपिधा(पीड)नौ । दोषवृद्धिक्षयावपि दक्षिणान्यपादषोडशतया । योगैस्ताश्च निवृ त(र्त)येत् । अनाम(य)पालनं कुर्यात् । आमद्व(य)स्सर्वरोगाणाम् आधिभूतमहाब्रह्म । तन्निवृत्तिरनामयम् । अनामयादात्मानं मन्यते अहंप्रत्ययः । कर्मकर्ता

* * * *

यः कर्ता कर्मभोगकर्ता शरीरी अशरीरी नास्त्यमत्ति न केवलं शरीरं भोगयोग्यमात्मनेऽयोगात् ।

* * * *

**Colophon:**

इत्यायुर्वेदे प्रथमपत्रं समाप्तम् ॥

**End:**

आर्द्रकादिव(द)शद्रव्यं काथलेहरूपं ग्रहणीरोगनिवर्तकम् । लशुनादिद्वादशद्रव्यं चूर्णकाथलेहघृतरूपं मन्दानलरोगनिवर्तकम् । एलादिषट्पदार्थाः चूर्णकाथविकारभूताः मन्दानलरोगनिवर्तकाः ।

आयुषा(ष्का)मयमानेन धर्मार्थसुखसाधनम् ।
आयुर्वेदोपदेशेषु विधेयः परमादरः ॥

* * * *

व्र(वृ)द्धिरसमानैस्सर्वेषां विपरीतैर्विपर्ययः ।
चयः प्रकोपप्रशमौ वायोर्ग्रीष्मादिषु त्रिषु ॥

**Colophon:**

इत्यायुर्वेदस्य सप्तदशपत्रं समाप्तम् ॥

---

## No. 13088. आयुर्वेदः.
## AYURVEDAH.

Pages, 131. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 13073.

Contains the Praśnas 1 to 17 complete.

Same work as the above.

Name of the copyist—Kōlacalli Vēṅkaṭapati. Date of transcription—15th day of the bright fortnight of the Vaiśākha month in the year Akṣaya.

## No. 13089. आयुर्वेदार्थसारस्यम्.

## AYURVEDĀRTHASĀRASYAM.

Pages, 10. Lines, 6 on a page.

Begins on fol. 21*a* of the MS. described under No. 13077.

Incomplete.

This work purports to give the essence of what is found in the Āyurvēda regarding the symptoms, the diagnosis and the treatment of diseases, etc. The author salutes Vēṅkaṭācala, son of Rāmana, and quotes from Bāhaṭa.

**Beginning :**

अघोरेशं कविश्रेष्ठं गोपाल भुवनेश्वरम् ।
गणाधिपं गुरुं लक्ष्मीं नमामि सततं गुरुम् ॥
चेतु षष्ठे कदाध्यक्षं(?) सर्वविद्याविशारदम् ।
वेङ्कटाचलनामाख्यं रामनाह्वयनन्दनम् ॥
आयुर्वेदार्थसारस्यमाकृष्य ग्रन्थमुत्तमम् ।
आदानं च निदानं च चिकित्सा संहृता यदि ॥
साध्यासाध्यविधिं वक्ष्ये सवायुरुजनिर्णयम् ।
भिषक्सर्वसमालोक्यं जनानां हितकारणम् ॥

अथ नानाविधस(र्व)वायुं व्याख्यास्यामः—

वसन्त आमकालेषु मन्मथोद्दीपितो यथा ।
श्री(स्त्री)पुंससङ्गमेनैव उल्बणं मर्म वारिणा ॥

सङ्गमपरहितं वाहटे—

त्रिपादहसन्तशरदोः पक्षो प्रेष्ठ निदाघयोः ।
सेवेत कामतः कामं तृषावाजिकृतां हिमौ ॥
रोगिणां सङ्गमं मेघद्रावीभवति तत्क्षणात् ।
स्पर्शवेदिरसं स्पृष्ट्वा अयने स्वर्नतानिता ।

**End :**

समगरलतरुणार्कम्—

गोदन्तहिङ्गुलं तुल्यं द्वयोस्तुल्यं हलाहलम् ॥
सर्वतुल्यं सर्वविषं मर्दनं दिवसत्रयम् ।
जम्बीरवारिणा क्षेप आर्द्रकस्वरसेन च ॥

तरुणार्करसो नाम नित्यनाथेन निर्मितम् ।
व्रीहिमात्रप्रयोगेण सर्वदोषहरं परम् ॥

---

## No. 13090. चरकसंहिता.
## CARAKASAMHITĀ.

Substance, palm-leaf. Size, 16⅞ × 1⅞ inches. Pages, 12. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Nidānaviṣaya 22*a*, Sadvaidyajīvana 29*a*, Prasnōttararatnamālā 42*a*, Cidambarastuti 62*a*, Vādaprakriyā (Kanarese Vaidya) 70*a*.

Breaks off in the fifth Adhyāya of the Sūtrasthāna.

Same work as that described under No. 52 on pages 25, 26, 159 and 160 of M. Seshagiri Sastri's Report No. 1. A complete system of medicine by Caraka.

---

## No. 13091. चरकसंहिताव्याख्या—पञ्चिका.
## CARAKASAMHITĀVYĀKHYĀ : PAÑCIKĀ.

Substance, (Śrītāla) palm-leaf. Size, 21½ × 2 inches. Pages, 77. Lines, 9 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Breaks off in the second Adhyāya of the Sūtrasthāna.

A commentary on the Carakasamhitā of Carakācārya. The commentary is called Pañcikā. By Ācāryasvāmi-Kumāra

**Beginning :**

शक्तेः प्रपञ्चोद्भवभङ्गहेतोः परश्शिवः पूर्णसुखार्णवो यः ।
संसाररोगापनुदं पुराणं भिषक्तमन्तं भिषजं नमामि ॥
यश्चित्ते निभृशं न(तं नि)चाय्य बहिरप्यानन्दबुक्तो(तृप्त्यो)द्यतं
भक्तानामपि दर्शे . . . आग्रहारे हरम् ।
वाचं व्याकरणेन शुद्धिकर(म)करोद्योगेन चित्तस्य यत्
तं वन्दे चरकसंहितायां व्याख्यानवैद्यागमम् ॥
ब्रह्माणमादौ तदनु प्रजापतिं तथाश्विनौ नाकसतां च नायकम् ।
नत्वा भरद्वाजमथात्रिनन्दनं तथाग्निवेशप्रभृतीन् मुनीनपि ॥
मुनिं हरिश्चन्द्रमृषिं विपश्चितां प्रकाशितार्थं च कथं चकार यः ।
कस्याद्भुतार्थां (च) श्रुतिं प्रमादः (?) परीक्ष्य कुर्मः चरकस्य पञ्चिकाः ॥

* * * *

तस्मादेतादृशाः पतितसमस्तदोषपरिजिहीर्षया तन्त्रार्थतत्त्वव्याख्याने सर्वलोकोपकाराय प्रेक्षावद्भिर्म . . . . . . . . . तत्र तन्त्राण्यतन्त्रमित्युक्तमाचार्येण । अस्यायमर्थः—

अनेनायुर्वेदेन स्वास्थ्यानुत्पत्तिं कुर्वता दोषांश्च निघ्नता तन्यते त्राय्यते शरीरमिति तच्च तन्त्रं समासतः षट् पदार्थाः । तत्प्रतिपादकत्वात्

* * * *

तन्त्राधिकरणं नाम यन्निमित्तमधिकृत्य प्रवर्तते कर्ता

विघ्नभूता यदा रोगाः प्रादुर्भूताश्शरीरिणाम् । इत्यादि तदेतन्निमित्तीकृत्य जगदनुकम्पया महर्षिरयमन्तेवासिनामायुर्वेदोपदेशाय प्रवृत्त इति । योगो नाम योजना अन्यानाम् । यथा धीधृतिस्मृतिविभ्रंशः संप्राप्तिः कालकर्मणाम् । इत्यस्य सूत्रस्य भाष्यं

* * * *

तत्रेदमाचार्यसूत्रम्—अथातो दीर्घं जीवितीयमध्यायं व्याख्यास्याम इति अष्टपदं चेदं सूत्रम् : अथ, अतः, दीर्घं, जीवितीयम्, अधि, आयं, वि, आख्यास्यामः, इति पदव्याख्या । अतः परं पदार्थव्याख्या, किमयमथशब्दो गवाश्वादिपदार्थशब्दवदर्थवान्? उत डित्थडिमित्यादिवदपदार्थकः? अर्थवत्त्वेऽपि दध्यक्षादिपदपङ्क्तिवन्मङ्गलार्थवाची? किं वा क्षामनष्टहतदग्धादिपदवदमङ्गलार्थ इति संशये अर्थवान् मङ्गलार्थश्चेति ब्रूमः ।

* * * *

अन्विच्छन्निति अनुशब्दस्साहश्यवाची, तेनायमर्थस्संपद्यते, निरतायुषां (त)दनुरूपं रसरसायनाभिवृद्धमरोग(मि)च्छन्निति । भरद्वाज इति गोत्रनाम, उपागमत् समीपं गतवान् ।

**End:**

पूर्वमर्थस्येदं निगमनम्, तदेतानर्थानखिलान् यतः सूत्रकारस्य व्याख्या संग्रहप्रवृत्तिरिति ॥

**Colophon:**

इत्याचार्यस्वामिकुमारविरचितायां चरकपञ्चिकायां श्लोकस्थाने भेषज इव चतुष्के दीर्घजीवितीयो नाम प्रथमोऽध्यायः ॥

अथातोऽपामार्गतण्डुलीयं नामाध्यायं व्याख्यास्याम इति हस्माह भगवानात्रेयः ।

यथाह्ययमथशब्द आनन्तर्यार्थः दीर्घजीवितीयानन्तरमपामार्गतण्डुलीयं नामाध्यायं व्याख्यास्याम इति ।

* * * *

तेषु पञ्चत्वव्यवहारस्यैव संभवः, न पञ्चाशदुव्यवहारः, पञ्चशतव्यवहारो वा तदाश्रितेषु तु द्रव्येषु कषाय ।

---

## No. 13092. चरकसंहिताव्याख्या.
## CARAKASAṀHITĀVYĀKHYĀ.

Pages, 151. Lines, 11 on a page.

Begins on fol. 1a of the MS. described under No. 13071.
Contains the third Adhyāya of the Sūtrasthāna.
Similar to the above. By Hariścandra.

**Beginning :**

स्वयम्भुवे प्राणभृदन्तरात्मने जगत्प्रदीपाय महाद्भितैषिणे ।
विवस्वते दीप्तसहस्ररश्मये सुरोत्तमायामिततेजसे नमः ॥
अजाय प्रोक्तमवद . . . . . . . . . . . . ।
. . . . . . . . . . . . . . . . . . . . ॥
. . . . . . . मान भिन्नकर्म[व]हतमप्यधिकं विरुद्धम् ।
अत्यर्थविस्तरसमासमहेतुकं वा ग्रन्थेन यस्य व . . . . . ॥
. . . . . . . विशेषयुक्तमोजं निर्हेतुकमुदाहरणोपपन्नम् ।
कार्त्स्न्यक्रमोपहितसङ्ग्रहसूत्रभाष्यं यो दृष्टवान् त्रिविधशिष्यहिताय तन्त्रम् ॥
त्यक्त्वा प्रसङ्गविषयं सुपरीक्ष . . . . . . . . . . . . . ।
. . परीक्ष्य खलु येन तदेव शास्त्रम् . . संज्ञां च गमं विशेषतोऽर्थः(?) ॥
लोकोपकार . . . कविसत्तमाय भक्त्या प्रणम्य महते चरकाय तस्मै ।
वक्तुं . . . . मार्गा इव प्रणष्टः नैतर्हि वस्तु कथंचिदपि तद्विशिष्टम् ॥
बीजश्रिरात्र हि फलम . . . . . . . .
. . . . . . . . . . . . पदार्थमात्रम् ।
श्रेष्ठास्त एव खलु यैस्त्रयमर्थमार्गः
प्राग्दर्शितः प्रणितमन्येषु चायाभिधातुमहं प्रवृत्तः (?) ॥
कार्यं कृते खलु बुधैः प्रथमं पय . न्दनि कुष्ठ . . . च कथंनु पश्येत् ।
अर्थं तमेव तु पुराणमुनिप्रजगतोऽस्य विलस्य शास्त्र . . . . . . ॥

* * * *

वाक्यप्रकरणाध्यायचतुष्कस्थानान्तन्त्रावयवानां तत्र समुदायानां च

अत्र पदसमुदायस्सूत्रम् । सूत्रसमुदायो वाक्यम् । (वाक्य) समुदायः प्रकरणम् । प्रकरणसमुदायोऽध्यायः ।

* * * *

स्वाभिप्रायकृतायां व्याख्यायामेवावतरोऽस्तीति नस्तत्र तन्त्रकारणोपाय इति अत एव तदपवदामहे ।

तन्त्रयुक्तिस्समाप्तः(प्ता) ॥

अतः परितन्त्रे यथा प्रकृतमेव तन्त्रा मुद्भावयिष्यामः । तत्र च अथातो दीर्घं जीवितीयमध्यायं व्याख्यास्याम इति तन्त्रादावुपदिश्यते । अत्र च सम्बन्धादयो धर्मास्समुपादेयाः । तत् कस्मादभिव्यक्तिः ॥

* * * *

सूत्रकारस्य न्याय्या सङ्ग्रहप्रवृत्तिरिति ।

**Colophon:**

इति आचार्यहरिश्चन्द्रकृतौ प(प्र)शिष्योपाध्यायकीयन्यासे भेषजचतुष्के दीर्घजीवितीयः प्रथमोऽध्यायः ।

आहापामार्गतण्डुलीयस्य दीर्घजीवतीयादनन्तरमभिधाने कस्सम्बन्धः ।

**End:**

विस्तरोऽपि अकुशबुद्धिनिर्णेतुमर्थपिण्डप्रत्ययादतस्साधीयो द्विविधव्याख्यायोजनमिति ॥

**Colophon:**

(आ)रग्वधीयं नाम तृतीयोऽध्यायः ॥

---

No 13093. द्वादशार्थनिरूपणम्, द्राविडटीकासहितम्.

DVĀDAŚĀRTHANIRŪPAṆAM WITH TAMIL MEANING.

Pages, 62. Lines, 19 on a page.

Begins on foll 141*a* and 190*b* of the MS. described under No. 13078. Complete.

Similar to the above. It is accompanied by meaning in Tamil. Deals with the following subjects:—

१. दोषनिरूपणम्.
२. प्रकृतिनिरूपणम्.
३. अग्निनिरूपणम्.
४. सप्तधातुनिरूपणम्.
५. सत्त्वनिरूपणम्.
६. बलनिरूपणम्.

७. वयोनिरूपणम्.
८. देशनिरूपणम्.
९. कालनिरूपणम्.
१०. सात्म्यनिरूपणम्.
११. आहारनिरूपणम्.
१२. भेषजनिरूपणम्.

**Beginning:**

आयुर्वेदार्थकर्पूरं चामीकरकरण्डकम् ।
वन्देऽहं वाक्पटुभ्वा(भ्मटाचा)र्यं विद्वद्वैद्यशिखामणिम् ॥
दोषाः प्रकृतयो वह्निर्दूष्यं सत्त्वं बलं वयः ।
देशकालौ तथा सात्म्यमाहारो भेषजानि च ॥
एतानि सर्वदा नित्यं वीक्ष्य द्वादश तत्त्वतः ।
चिकित्सां योजयेत्प्राज्ञो न योगैरेव केवलम् ॥

**End:**

अग्निमान्द्यप्रलापं च निद्रानाशो अस्वक्कम् ।
किञ्चिच्छ्वासतृषातन्द्रा शीतिकाज्वरलक्षणम् ॥

**Colophon:**

अयं ग्रन्थस्समाप्तः ॥

---

## No. 13094. द्वादशार्थनिरूपणम्.

### DVĀDAŚĀRTHANIRŪPAṆAM.

Substance, palm-leaf (Śrītāla). Size, 20⅝ × 1½ inches. Pages, 8. Lines, 12 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 1a. The other works herein are Mādhavanidāna 3b, Rasakacchapuṭa 27b, Rasabhēṣajakalpadīpikā 92b, Siddhayōga 99a, Kailāsakāraka 141a.

Complete.

A treatise in medical science dealing with 12 topics as mentioned below in its 12 chapters. They give the origin and nature of diseases, the general condition of the body during health and disease and the principles of medical treatment:

१. दोषाधिकार.
२. प्रकृत्यधिकार.
३. वह्न्यधिकार.
४. दूष्याधिकार.
५. सत्त्वभेदाधिकार.
६. बलाधिकार.
७. वयोऽधिकार.
८. देशाधिकार.
९. कालाधिकार.
१०. सात्म्याधिकार.
११. आहाराधिकार.
१२. भेषजाधिकार.

**Beginning:**

. . . . . . . . . . . तथा मिथ्योपचारतः ।

* * * *

स्तम्भः कषायरसता वर्णस्यावारुणोद्भवा ।
कर्माणि वायोः पित्तस्य दाहरोगोष्मव . . . ॥
. . . . . . . . . . वर्णपाण्डुरारुणवर्जितः ।
श्लेष्मणः स्नेहकाठिन्यं कण्डूशीतत्वगौरवम् ॥

* * * *

अशीतिर्वातजा रोगाश्चत्वारिंशच्च पित्तजाः ।
विंशतिः श्लेष्मजा रोगा . . . . न्विधाः ॥
आद्यं पादतलो वायुः पादाक्षेपस्त्वनन्तरम् ।

**Colophon:**

इति द्वादशार्थनिरूपणे दोषाधिकारो नाम प्रथमः पटलः ॥

**End:**

भिषग्द्रव्याण्युपस्थातरोगी दोषचतुष्टयम् ।
चकितं च विनिर्दिष्टं प्रत्येकं तच्चतुर्गुणम् ॥
शास्त्रेषु श्रमवान् क्रियासु कुशलः प्राज्ञः कृतज्ञः शुचिः
धीरो रोगनिरूपणक्षमकलः पीयूषहस्तस्पृहाः ।
द्रव्याणां रसवीर्यकार्यमखिलं वेत्ता च यो धीरधीः
निर्णेतानलदेशकालवयसो मात्राधिकारी भिषक् ॥
चण्डं . . . . . . . . कृतघ्नं दुष्टकर्मकम् ।
हीनोपकरणं व्यग्रमविधेयं गतायुषम् ॥
विकृते विकृतोक्तानां सार्वकालं विवर्जयेत् ।
इति ज्ञात्वा क्रियां कुर्यात् स वैद्यः श्रेष्ठतां भजेत् ॥

**Colophon:**

इति द्वादशार्थनिरूपणे चिकित्साधिकारो नाम द्वादशः पटलः ॥

---

No. 13095. वैद्यचिन्तामणिः, आन्ध्रटीकासहितः.

VAIDYACINTĀMAṆIḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 10½ × 1½ inches. Pages, 156. Lines, 4 on a page. Character, Kanarese. Condition, injured. Appearance, old. Incomplete; breaks off in the portion relating to the Daśakaṣāya.

A treatise on medicine dealing with the diagnosis of diseases, with the purifications of substances for being used in medicinal preparations, with mercurial compounds and with the preparation of drugs, decoctions, etc., for the curing of diseases. The author is Vallabhēndra, son of Amarēśvarabhaṭṭa of Śrīvatsagōtra and of Āpastambasūtra. He belonged to the Indrakaṇṭhi family (vide B. No. 928).

**Beginning:**

श्रीनाथं पार्वतीनाथं वाणीनाथं सरस्वतीम् ।
दुर्गावय(टु)कहेरम्ब(म्बान) नमस्ते सतता (सततं च नमाम्यहम्) ॥
श्रीवत्सगोत्रतिलकं जगद्वैद्यपितामहम् ।
अमरेश्वरभट्टस्य प्रियसूनुं गुणोत्तमम् ।
वल्लभेन्द्रं वि(न्द्रेण)रचितं जनानां हितकारणम् ॥
वैद्यचिन्तामणिर्नाम भैषज्यग्रन्थमुत्तमम् ।
निदानं द्रव्यशुद्धिं च रसयोगान् कषायकान् ॥
वक्ष्यते वैद्यलाभाय एतत्सर्वं सविस्तरम् ।
निदानं द्रव्यशुद्धं च (तथा) योगान् कषायकम् ।
ययोर्मध्ये पुरा वक्ष्ये निदानं शास्त्रसंमतम् ॥
आदौ समस्तरोगेषु अ(ष्ट)ष्टस्थानं परीक्षयेत् ।
नाडीं स्पर्शं च रूपं च शब्दं नेत्रे पुरीषकम् ॥
मूत्रवर्णं च जिह्वां च एतान् दृश्यन् भिषग्वरैः (पश्येद्भिषग्वरः)

* * * *

**Colophon:**

इति श्रीमदापस्तम्बकुलदुग्धार्णवपूर्णसुधाकरश्रीवत्सगोत्रतिलकसमस्तविद्याधुरीणश्रीअमरेश्वरभट्टारकप्रियतनूजभैषज्यविद्यापारीणसकलविद्याकलाप्रवीणश्रीमदिन्द्रकण्ठीवल्लभार्यविरचितं वैद्यचिन्तामणिज्वरसन्निपातदोषातिसारनिदानं नाम प्रथमो विलासः ॥

**End:**

जीरकं त्रिकटुं चार्द्रं निर्गुण्डीवह्निभृङ्गरात् ।
वशागडूचीशिग्रुस्त्वक् नागवल्लिदलानि च ॥
शर्करातुलसीचोललवङ्गं लशुनं घनम् ।
य इदं चानुपानेन ज्वराणां सेवते भिषक् ॥

* * * *

**Colophon:**

इति श्रीमदापस्तम्बकुलसुधार्णवपूर्णसुधाकरश्रीवत्सगोत्रतिलकसमस्तविद्याधुरीणश्रीविद्याकलाप्रवीणश्रीवल्लभेन्द्रविरचितवैद्यचिन्तामणौ रसयोगनस्याञ्जनधूपमन्वानु . यविलासः ॥

श्रीखण्डममृतामुस्ता नागरं च . . . . . . ।
क्वाथो वातज्वरं हन्यादृशनि . . . . . . ॥

* * * *

अथ अतिसारकषायाणि वक्ष्यन्ते ।
क्वाथं सर्वज्वरं हन्ति . . . . ॥

---

No. 13096. वैद्यचिन्तामणिः, आन्ध्रटीकासहितः.

VAIDYACINTĀMAṆIḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 18¾ × 1¾ inches. Pages, 30. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Cikitsāsārasaṅgraha (with Telugu meaning) 18*a*, Dūtādhyāyamu 39*a*, Vaidyayōgasaṅgrahamu 42*a*.

Contains the Rasayōga and the Atisāracikitsā.

Similar to the above.

**Beginning:**

श्रीनाथपार्वतीनाथवाणीनाथसरस्वतीः ।
दुर्गावटुकहेरम्बान् समस्तसन्तता(स्तान् संनमा)म्यहम् ॥

* * * *

अथ रसयोगा वक्ष्यन्ते—

भूपतिर्नवलोहाख्या रससिद्धा लघुर्महत् ।
प्रतापप्राणा दिव्याख्या उत्तमाः कथिता दश ॥

**End:**

पथ्यादोषपुनर्नवाम्बुधनिकापूतिक्तयुग्माजटा-
पाटाविल्वगुणप्रियोरलु कणामूत्रगन्धादिभिः ।
चव्यादित्यकबाणपुङ्खिसहितैर्वर्तं प्रसिद्धं जलं
देयं तद्वहुदोषजः गृहिणिभिर्दिव्यैर्यथैवामृतम् ॥

## No. 13097. वैद्यचिन्तामणिः, आन्ध्रटीकासहितः.

### VAIDYACINTĀMAṆIḤ WITH TELUGU MEANING.

Pages, 29. Lines, 22 on a page.

Begins on fol. 156*a* of the MS. described under No. 160 of the D.C. of Telugu MSS.

Contains the Rasayōga and the Atisāracikitsā.

Same work as the above.

---

## No. 13098. वैद्यचिन्तामणिः.

### VIADYACINTĀMAṆIḤ.

Pages, 26. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 13083.

Contains the first Vilāsa complete.

Same work as the above.

**Colophon :**

इति श्रीमदापस्तम्बकुलसुधार्णवसुन्दरा(धा)करश्रीवत्सगोत्रतिलकसमस्तविद्याधुरीणश्रीअमरेश्वरभट्टवरप्रियतनूजभैषज्यविद्यापारीणसकलकलाप्रवीणश्रीइन्द्रकरवल्लभनामविरचितवैद्यचिन्तामणौ ज्वरसन्निपातदोषातिसारनिदानं नाम प्रथमविलासः॥

---

## No. 13099. वैद्यशास्त्रम्, द्राविडटीकासहितम्.

### VAIDYAŚĀSTRAM WITH TAMIL MEANING.

Pages, 117. Lines, 19 on a page.

Begins on fol. 83*a* of the MS. described under No. 13078.

A treatise in medicine dealing with the development of fœtus in the womb and with symptoms of diseases and the curative medicines to be administered in each case.

Contains the following subjects :—

१. पिण्डोत्पत्तिः.
२. दशवायुस्थानम्.
३. अग्निप्रकरणम्.
४. नाडीनिदानम्.
५. रोगलक्षणम्.
६. औषधविधानम् (with Tamil meaning).

**Beginning :**

धात्रीज्योतिर्नभस्समीरमुदकं वातादि पैत्त्यं कफं
धातू चर्ममलादि वायुदशभिः सम्राश्रितं स्नायुतम् ।

सूक्ष्मत्रायुतलक्षलक्षगुणितं स्थौले चतुर्विंशतिः
कूटेष्वत्र य(च)रोमकूपनिचयं साष्टाशतं शल्यकम् ॥

* * * *

षण्णवत्यङ्गुलं कायं भूभागं पतनं तथा ।
एतद्विधं क्रमेणैव पिण्डोत्पत्तिं प्रकाशयेत् ॥
प्रथमे कलले मासे द्वितीये च घनं भवेत् ।
तृतीयेऽङ्कुरतद्भावं चतुर्थेऽस्थिसमायुतम् ॥

**End:**

पलाशवृक्षमूलं च रम्भाकन्दं जलच्युतम् ।
मेहारिराजवृक्षं च कारवल्ली च . . . . ॥

---

No. 13100. शास्त्रदीपिका.

ŚĀSTRADĪPIKĀ.

Substance, paper. Size, 11¼ × 8⅜ inches. Pages, 392. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

A treatise on the diagnosis and treatment of various maladies.

The following topics are dealt with in this work:—

१. ज्वरसन्निपातनिदानम्.
२. राजयक्ष्मप्रकरणम्.
३. विषूचीमन्दाग्निचिकित्सा.
४. जङ्गमविषप्रकरणम्.

**Beginning:**

गण्डस्थलप्रविलसन्मदवारिधारागन्धभ्रमद्भ्रमरविभ्रमलोलकर्णम् ।
गन्धर्वसिद्धसुरकिन्नरगीयमानं गङ्गावरस्य तनयं शरणं प्रपद्ये ॥
दोषकोपं क्षयं कालं पञ्चवायोश्च लक्षणम् ।
अनूपादिग(म)देशानां बाल्यादिवयसां तथा ॥
कार्यादि(दी)नस्थिसङ्ख्यां च शरीरस्य च लक्षणम् ।
पापकर्म च रोगाणां देवब्राह्मणपूजनम् ॥
दिनचर्यां समारभ्य चौषधं गणसङ्ग्रहः(म्) ।

* * * *

पेयाकल्पनमुख्यं च चिकित्सासारमुत्तमम् ॥
अथातो रोगसङ्ख्या च सङ्ग्रहेण यथाक्रमम् ।
ज्वरादिव्यपर्यन्तं वक्ष्यते च यथामति ॥

ज्वरीषधा(धं) समुद्दिष्टः(ष्टं) सन्निपातास्त्रयोदश ।
रक्तपित्तस्य भेदास्तु त्रिधा कासस्तु पञ्चधा ॥

* * * *

**Colophon:**

इति शास्त्रदीपिकायां ज्वराणां सन्निपातानां च निदानप्रकरणम् ॥

* * * *

इति शास्त्रदीपिकायां राजयक्ष्मप्रकरणम् ॥

* * * *

इति शास्त्रादर्शे विषूचीमन्दाग्निचिकित्सा ॥

**End:**

पुनर्नवौ बृहत्यौ च शारिवे कटुकत्रयम् ।
यवागुरेषां निष्काथे कृता हन्ति विषाद्वयम् ॥
दिवास्वप्नं व्यवायं च व्यायामं क्रोधमातपम् ।
सुरातिलकुलुत्थांश्च वर्जयेच्च विषातुरः ॥
निम्बशिग्रुकयोः पत्रं बृहतीफलमेव च ।
तैलाभ्यञ्जनपानाभ्यां(भ्यान्)वर्जयेच्च विषातुरः ॥

**Colophon:**

इति शास्त्रदीपिकायां जङ्गमविषप्रकरणं समाप्तम् ॥
शास्त्रादर्शमिदं सम्यक् सर्वशास्त्रकलाविदः ।
श्रीतिर्मलार्यविदुषः दर्शनीयमिदं सताम् ॥

---

## No. 13101. सुश्रुतम्.
## SUŚRUTAM.

Substance, paper. Size, 13 × 8¾ inches. Pages, 90. Lines, 16 on a page. Character, Telugu. Condition, fair. Appearance, old.

Contains the following Adhyayas of the Śārīrasthāna:—

१. सर्वभूतचिन्ताशारीरम्.
२. शुक्रशोणितशुद्धिशारीरम्.
३ गर्भावक्रान्तिशारीरम्.
४. गर्भव्याकरणशारीरम्.
५. शरीरसङ्ख्याव्याकरणम्.
६. प्रत्येकमर्मनिर्देशः.
७. सिरावर्णनविभक्तिः.
८. सिराव्यधविधिः.
९. धमनीव्याकरणशारीरम्.
१०. गर्भिणीव्याकरणशारीरम्.

A well-known complete system of medicine in six Sthānas, viz., Sūtra, Nidāna, Śārīra, Cikitsā, Kalpa, and Uttara: by Suśruta. The work has been printed in Calcutta.

**Beginning:**

अथातः सर्वभूतचिन्ताशारीरं व्याख्यास्यामः । सर्वभूतानां कारणमकारणं सत्त्वरजस्तमोलक्षणमष्टरूपमखिलस्य जगतः संभवहेतुरव्यक्तं नाम । तदेव बहूनां क्षेत्रज्ञानामधिष्ठानम् ।

* * * *

अन्योन्यानुप्रविष्टानि सर्वाण्येतानि निर्दिशेत् ।
स्वे स्वे द्रव्ये तु सर्वेषां युक्तं लक्षणमिष्यते ॥
अष्टौ प्रकृतयः प्रोक्ताः विकाराः षोडशैव तु ।
क्षेत्रज्ञाश्च समासेन स्वतन्त्रपरतन्त्रयोः ॥

**Colophon:**

इति सर्वभूतचिन्ताशारीरं प्रथमोऽध्यायः ॥

**End:**

सौवर्णं सुकृतं चूर्णं कुष्ठं मधु घृतं वचा ।
मत्स्याक्षकः शङ्खपुष्पी मधु सर्पिस्सकाञ्चनम् ॥
अर्कपुष्पी मधु घृतं चूर्णितं कनकं वचा ।
हेमचूर्णानि कैडर्यः श्वेता दूर्वा घृतं मधु ॥
चत्वारोऽभिहिताः प्राणाः श्लोकार्धेषु चतुर्ष्वपि ।
कुमाराणां वपुर्मेधाबलबुद्धिविवर्धनाः ॥

**Colophon:**

इति सुश्रुते आयुर्वेदशास्त्रे शारीरस्थाने गर्भिणीव्याकरणशारीरं नाम दशमोऽध्यायः ॥

शारीरस्थानं समाप्तम् ॥

---

## (B) TREATISES ON SPECIAL SUBJECTS.

---

### No. 13102. अक्षिरोगनिर्मूलनम्.

### AKṢIRŌGANIRMŪLANAM.

Substance, palm-leaf. Size, $1\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 17. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1a. The other work herein is Ācāranavanītam 10a. Complete.

This is stated to form the 94th Adhyāya of the Sanatkumārasaṁhitā of the Pañcarātrāgama and deals with the treatment of eye-diseases. It is said to have been originally revealed by Sanatkumāra to Nārada. The kind of treatment explained herein is said to have met with success in the case of Bṛhadratha, son of Paribhadra, king of Kāśī (vide R. No. 1327*a*).

**Beginning :**

शुक्लाम्बरधरं विष्णुं . . विष्वक्सेनं तमाश्रये ॥
सनत्कुमारं योगीन्द्रं सिद्धाश्रमनिवासिनम् ।
नारदः प्रणिपत्याथ वचनं चेदमब्रवीत् ॥
भगवन् योगिनां श्रेष्ठ सर्वतन्त्रविशारद ।
सर्वरोगहरास्त्वत्तः कल्पाश्च विविधाः श्रुताः ॥
इदानीमक्षिरोगस्य शान्तिं ब्रूहि तपोधन ।
इत्युक्तस्स मुनिश्रेष्ठस्सिद्धार्थस्सर्वमन्त्रवित् ॥

सनत्कुमारः—

शृणु नारद धर्मज्ञ कल्पनारायणाख्यकम् ।
अक्षिरोगहरं पुण्यमायुष्यं पापनाशनम् ॥

नारदः—

इमं कल्पं पुरा लोके यः कृत्वा सुखमाप्नुयात् ।
तमहं श्रोतुमिच्छामि भवान्वक्तुमिहार्हसि ॥

सनत्कुमारः—

काशीपुर्यां पुरा ब्रह्मन् आसीद्राजा सुधार्मिकः ।
पारिभद्र इति ख्यातः तस्य पुत्रो बृहद्रथः ॥

* * * *

भगवन् मम पुत्रस्य अक्षिरोगो भयावहः ।
तस्य शान्तिर्भवेत्केन तत्त्वं ब्रूहि महामुने ॥
मध्वक्तैः तिन्त्रिणीपुष्पैः चक्रगायत्रिया हुनेत् ।
## RASARAÑJANAM.

Pages, 40. Lines, 15 on a page.

Begins on fol. 231*a* of the MS. described under No. 1197.

Incomplete.

Restored from the MS. described under the next number.

On the preparation of certain mercurial mixtures and medicines.

**Beginning:**

कुङ्कुष्ठं गिरिहंसपाकरसिकं जातस्य त्रिमाक्षिकं
लाक्षारोचनकुङ्कुमं नवनिशा बिल्वं च राजापलम् ।
नागं कण्टकपत्रवेतनश्रुतं छागीमयूरोदितं
रक्तं मर्दी पलाशकाष्ठपुटितं नागः क्षणाद्रञ्जनात् ॥
गन्धकाभ्रमरतैलेन डोलायन्त्रे विपाचयेत् ।
काचपात्रे तु संस्थाप्य लोहपात्रे विनिक्षिपेत् ॥
तद्रसैश्चैकभागं च तद्वत् क्षाराणि निक्षिपेत् ।
मातुलुङ्गाम्लपूरेण तल्लोहग्रासको भवेत् ॥
द्विगुणं गन्धकं चैव हिङ्गुलं च चतुर्गुणम् ।
पञ्चभागं मनश्शैला पञ्चभागं च शुद्ध (हेममा)क्षिकम् ॥

**End:**

नन्दिस्कन्दकुमाराद्यवक्ष्यमाणं हरन्ति च ।
नष्टच्छायासु दृश्यन्ते हस्ते दधति भस्म च ॥
क्रियमाणं रसं तैस्तु मूढबुद्धिर्न दृश्यते ।
कथयेत्सर्वजन्तूनां नयेत्सिद्धिरसायनम् ॥
न(त)थोस्तु रससिध्द्यर्थं तद्वत्क्लेशो मया कृतः ।
मानी कृतार्दहानी तु दुर्जये मूढचेतसाम् ॥
यादृशो नैव जानाति विधिहीनः ततः कृतम् ।
दद्यां नारी एकचित्तं मन्त्रतन्त्रं वरानने ॥

सम्प्राप्ते द्रव्यचिन्ता च तपो देवि रहः कृतम् ।
यस्य ताप्य(तुष्टः) शिवस्साक्षात् तस्य सिद्धिर्न संशयः ॥

---

## No. 13197. रसरञ्जनम्.
## RASARAÑJANAM.

Substance, palm-leaf. Size, 10 × 1¼ inches. Pages, 42. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Contains the same portion as in the MS. described under the previous number.

Same work as the above.

---

## No. 13198. रसरत्नसमुच्चयः.
## RASARATNASAMUCCAYAḤ.

Pages, 188. Lines, 6 on a page.

Begins on fol. 1a of the MS. described under No. 13175.

Incomplete.

On the preparation of medicines chiefly from inorganic substances. The first stanza given herein is quoted from the Rasaratnasamuccaya of Vāgbhaṭa, the younger.

**Beginning :**

रसरत्नसमुच्चये—

यस्यानन्दमयेन मङ्गलकलासम्भावितेन स्वयं (स्फुरद)
धामा(म्ना)सिद्धरसायनेन करुणाविष्टावुधासिन्धुना ।
भक्तानां प्रभवप्रसंह्वविजरारोगादिदोषान् (:) प्र(क्ष)णात्
शान्तिं यान्ति जगत्पुराणभिषजे तस्मै परस्मै नमः ॥
मिथ्यावादविषादाभ्यां दोषो ह्यामाशयं श्रयन् ।
बहिर्निरस्य नष्टाग्निं ज्वरदास्य रसानुगा ॥
श्वेतवर्णोंह(ऽङ्ग) सन्तापः सर्वाङ्गे ग्रहणं तथा ।
युगपद्यत्र रोगे तु रसस्य परिकीर्तितम् ॥

**End :**

आगारधूमं महिसा(षा)क्षियुक्तं सवाजिगन्धं (?) सतण्डुलीयकम् ।
गोमूत्रपिष्टो ह्यगदो निहन्ति विषाण्यपि स्थावरजङ्गमानि ॥

* * * *

तैलं तिलानां पलमिक्षुदं च क्षीरं तयाकेस्य समांसपीतम् ॥
अनन्तपत्रं लशुनं वचानां हिङ्गुं कुबेराक्षिसमानयोज्यम् ॥

---

No. 13199. रसरत्नाकरः.
RASARATNĀKARAḤ.

Substance, palm-leaf. Size, 16¼ × 1⅛ inches. Pages, 70. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains Upadēśas 1, 2, 3, 4 (duplicate), 5, 6, 7, 9, 10, 12, and 13 complete.

Contains the following Upadēśas of the Rasakhaṇḍa:—

१. शोधनमारणोपदेशः.
२. शोधनमारणोपदेशः रसेन्द्रखण्डस्थः (duplicate).
३. वज्रवैक्रान्तमारणोपदेशः.
४. अभ्रकमारणोपदेशः.
५. शुद्धसत्त्वपातनोपदेशः.
६. कान्तादिकिट्टमारणोपदेशः.
७. तैलपातनविषशोधनोपदेशः.
८. ज्वरनिदानम्.
९. वज्रवैक्रान्तमारणम्.

Same work as that described under R. No. 1932(c) of the Triennial Catalogue of MSS., Part I-C, wherein see for the beginning.

**End:**

रसमेकं द्विधा गन्धं रसतुल्येन गन्धकम् ।
नारीस्तन्येन मर्द्य तु लोहचूर्णसमन्वितम् ॥
सप्ताहं मर्दितं चैव मूषायन्त्रे विपाचयेत् ।
नीरजं जायते लोहं कथितं तु रसायनम् ॥

लोहताम्ररसायनम्—

ताम्रभस्म तु संशुद्धं लोहचूर्णं समानकम् ।
रसगन्धकसम्मिश्रं नारीस्तन्येन मर्दितम् ॥
सप्ताहपुटपाकेन लोहताम्ररसायनम् ।

---

No. 13200. रसरत्नाकरः.
RASARATNĀKARAH.

Substance, palm-leaf. Size, 15 × 1¾ inches. Pages, 33. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 1a. The other works herein are Mērutantra 18a, Vaidyaviṣaya (Tamil) 29a.

Incomplete and in disorder.

Same work as the above.

---

No. 13201. रसरत्नाकरः.

RASARATNĀKARAḤ.

Substance, palm-leaf. Size, 10¼ × 1 inches. Pages, 122. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Breaks off in the fifth Uapdēśa in the Rasakhaṇḍa.

Same work as the above.

---

No. 13202. रसरत्नाकरः.

RASARATNĀKARAḤ.

Pages, 199. Lines, 20 on a page.

Begins on fol. 1a of the MS. described under No. 5629.

Contains Paṭalas 1 to 20 of the Mantrakhaṇḍa.

Same work as that described under No. 7779, wherein it appears under the name of Kacchapuṭatantra. Deals with the following topics:—

१. मन्त्रसाधनम्.
२. सर्वलोकवशीकरणम्.
३. राजवश्यम्.
४. स्त्रीवश्यम्.
५. पतिवश्यम्.
६. आकर्षणम्.
७. अग्निजलस्तम्भनम्.
८. अशनिस्तम्भनम्.
९. मोहनोच्चाटनम्.
१०. मारणविधिः.
११. विद्वेषणादि.
१२. मन्त्रीकरणम्.
१३. कौतुकविधानम्.
१४. यक्षिणीमन्त्रसाधनम्.
१५. सर्वाञ्जनसाधनम्.
१६. निधिग्रहणम्.
१७. अदृश्यकरणम्.
१८. पादुकासाधनम्.
१९. मृतसञ्जीविनी.
२०. साङ्गोपाङ्गकच्छपुटप्रकरणम्.

**Colophon:**

इति रसरत्नाकरे सर्वलोकवशीकरणं नाम द्वितीयः पटलः ॥

* * * *

**Colophon:**

इति श्रीसिद्धनागार्जुनविरचिते रसरत्नाकरे कच्छपुटे राजवश्यं नाम तृतीयः पटलः ॥

* * * *

**Colophon :**

इति श्रीपार्वतीपुत्रनित्यनाथसिद्धविरचिते रसरत्नाकरे मन्त्रखण्डे साङ्गोपाङ्गकच्छपुटप्रकरणं नाम विंशतिः पटलस्समाप्तः ॥

---

No. 13203. रसरत्नाकरः.

RASARATNĀKARAḤ.

Substance, palm-leaf. Size, 13¾ × 1¼ inches. Pages, 226. Lines, 5 on a page. Character, Nandināgari. Condition, injured. Appearance, old.

Contains the following Upadēśas. Breaks off in the 19th Upadēśa of the Vādakhaṇḍa.

१. रसदीक्षा.
२. रसशोधनम्.
३. वज्रादिशोधनादि.
४. ताररञ्जनम्.
५. वर्णोत्कर्षणम्.
६. नागरञ्जनादि.
७. द्रुतसूतप्रयोगः.
८. वज्रस्तम्भनादि.
९. do.
१०. पक्षबीजविडवर्गशोधनम्.
११. संस्कारनवकम्.
१२. गन्धकाभ्रादिजारणम्.
१३. अभ्रकादिसत्त्वादि.
१४. द्वन्द्वसत्त्वादिबीजक्षारणम्.
१५. गर्भद्रावणम्.
१६. स्वर्णक्षारणम्.
१७. द्रुतपारदकथनम्.
१८. मृत्पाषाणादिवेधनम्.
१९. मणिवादः.

Same work as the above.

**Beginning :**

. . . . . . . . . . . . . क्रियतेऽधुना ॥
न क्रमेण विना शास्त्रं न शास्त्रेण विना क्रमः ।
तस्मात्क्रमयुतो ज्ञात्वा यः करोति स सिद्धिभाक् ॥
आचार्यो ज्ञानवान् दक्षो रसशास्त्रविशारदः ।
मन्त्रसिद्धो महावीरो निश्चलः श्रितवत्सलः ॥
देवभक्तस्सदा धीरो देवता . . . त्परः ।
सर्वाम्नायविशेषज्ञः कुशलो रसकर्मणि ॥
एवंलक्षणसंयुक्तो रसविद्यागुरुर्भवेत् ।
गुरुभक्तास्सदाचाराः सत्यवाक्या दृढव्रताः ॥

**End:**

. . . . कृत्वास्त . . . मर्दयेत्पुनः ।
म्रियते नात्र सन्देहो ध्मातस्तीव्रानलेन तु ॥
शुक्रचञ्चुगतं सूतं पुटयेद् ध्मापयेत्ततः ।
शतांशं वेधकचि(?)देहसिद्धिकरो भवेत् ॥

* * * *

**Colophon:**

इति श्रीपार्वतीपुत्रश्रीनित्यनाथसिद्धविरचिते वादखण्डे रसदीक्षा नाम प्रथमोपदेशः ॥

**End:**

सिद्धैर्भूचरसेवनाच्छिवमुखात् प्रासामहाजारणा
कृत्वा ताश्च रसे रसातलमिदं स्वर्णेन पूर्णीकृतम् ।
तेषां कर्म विचार्य सारमखिलं स्पष्टीकृतं तन्मया
यः कश्चिद्गुरुतन्त्रमन्त्रनिरतस्तस्यैव सिद्धं भवेत् ॥

**Colophon:**

इति श्रीपार्वतीपुत्रश्रीनित्यनाथसिद्धविरचिते रसरत्नाकरे वादखण्डे रत्नवज्रक्षारणाक्रमेण मृत्पाषाणवेधपर्यन्तं नामाष्टादशोऽध्यायः ॥

संसारे शास्त्रतन्त्रं स(क)लसुखकरं सुप्रभूतं घनं वै
. . . . . . . . . . . . . . . तस्य सिद्धौ ।
रत्नादीनां विशेषात्क्षरणमिह शुभं गन्धवादं समग्रं
ज्ञात्वा तत्तत्सुसिद्धं ह्यनुभवपदगं पावनं पण्डितानाम् ॥

---

No. 13204. रसरत्नाकरः, आन्ध्रटीकासहितः.

RASARATNĀKARAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 22. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 225*a*. The other works herein are Auṣadhayōgasaṅgrahamu (Telugu) 1*a*, Basavarājīya (with Telugu meaning) 10*a*, Śataślōki (with Telugu meaning) 178*a*, Vaidyayōgasaṅgrahamu 208*a*, Vaidyacintāmaṇi (with Telugu meaning) 236*a*.

Contains the first Upadēśa of the Rasēndrakhaṇḍa.

Same work as the above.

**Beginning:**

लोहशुद्धि:—

तल्लोहं तिलतैलेन पाचयेद्यामयात्रकम् ।
खर्जूरत्वक्कषायेण प्रक्षाल्यं शुद्धिमद्भवेत् ॥

* * * *

शुद्धलोहं मर्दयित्वा जम्बूत्वग्द्राविते पुनः ।
त्रयो गजपुटे पाच्य भस्मीभवति निश्चयम् ॥

**End:**

नाभिशुद्धिक्रमः—

सन्निपाते ज्वरे शोफे क्षयपैत्त्यकविभ्रमः ।
अमृतं तण्डुलीयेन त्रिवारं भावयेद्भिषक् ॥

* * * *

सोमरोगे मूत्रकृच्छ्रे मेहेषु वटपल्लवे ।
तद्रसे भावयेद्यामं विषशुद्धिर्भविष्यति ॥

* * * *

विषं गोमूत्रसंयुक्तं छागमात्रेण चाथवा ।
आतपे भावितं यामं शुद्धिर्भवति निश्चयम् ॥

* * * *

**Colophon:**

रसशुद्धिरसगुणगन्धकदोषगुणगन्धकशुद्धिनाभिजातिगुणशुद्धिस्समाप्ता ॥

इति श्रीपार्वतीपुत्रनित्यानन्दसिद्धविरचिते रसरत्नाकरे रसेन्द्रखण्डे रसप्रशंसानाम प्रथमोपदेशः ॥

---

No. 13205. रसरत्नाकरः, आन्ध्रटीकासहितः.

RASARATNĀKARAḤ WITH TELUGU MEANING.

Pages, 64. Lines, 8 on a page.

Begins on fol. 121*a* of the MS. described under No. 13144.
Incomplete.
Similar to the above.

**Beginning:**

रसं च गन्धकं चैव विषं हिङ्गु च चित्रकम् ।
त्रिक्षारं पञ्चलवणं वज्रवल्ली च सूरणम् ॥

मूर्वाचित्रकृतं चैव तत्समं घृतशर्करम् ।
खादेयं प्रातःकालेषु अष्टशूलविनाशनम् ॥

**End:**

हिकायां पाण्डुपित्तघ्नं वातश्लेष्मकफोद्भवम् ।
अयमग्निकुमारोऽयं पूज्यपादेन निर्मितम् ॥
पथ्यं चैव प्रदातव्यं दधिक्षीरं सशर्करम् ।
गात्रे चन्दनलिप्ताङ्गं पश्चात्ताम्बूलभक्षणम् ॥

---

## No. 13206. रसरत्नाकरः.
## RASARATNĀKARAH.

Pages, 35. Lines, 28 on a page.

Begins on fol. 201a of the MS. described under No. 13148.

Incomplete.

Same work as the above.

---

## No. 13207. रससारसङ्ग्रहः, कर्णाटकटीकासहितः.
## RASASĀRASAṄGRAHAH WITH KANARESE MEANING.

Substance, palm-leaf. Size, 14⅜ × 1⅛ inches. Pages, 24. Lines, 6 on a page. Character, Nandināgarī. Condition, much injured. Appearance, old.

Incomplete.

Deals with the preparation of mercurial mixtures and medicines.

By Gaṅgādhara Paṇḍita.

**Beginning:**

रसशुद्धिः—

नीलकण्ठं नमस्कृत्य श्रीगङ्गाधरपण्डितम्(:) ।
साधनं रसयोगानां सङ्ग्रहं सङ्गृहीतवान् ॥
मुक्तित्वाद्धरति रुजं बन्धनमनुभूय मुक्तिदा भवति ।
अमृतीकरोति म(च)मृतः कार्यः करुणारसेन रससूताद् ॥

**End:**

हिङ्गुलस्य पलान् पञ्च नारीस्तन्येन पेषयेत् ।
तेन लोहस्य पत्राणि लेपयेत्पलपञ्चकम् ॥

* * * *

सकलरोगहरम्.

### No. 13208. रससारसमुच्चयः.
### RASASĀRASAMUCCAYAḤ.

Substance, palm-leaf. Size, 15½ × 1½ inches. Pages, 104. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Similar to the work described under No. 13198. The text is followed by a Telugu commentary.

Date of transcription: 7th day of the dark fortnight of the Śrāvaṇa month in the year Śukla. Name of the scribe: Rōcayyakumāra Vīrayya.

**Beginning:**

चातुर्थिकं निहन्त्याशु पुराणज्वरनाशनम् ।
पुत्रसन्तानजननं मेदोवृद्धिबलप्रदम् ॥

बृहत्पोतिकनामायमश्विभ्यां निर्मितं पुरा ।
स्नेहस्य द्विगुणं क्षीरं क्षीरस्य द्विगुणं स्वरम् ॥

स्नेहपादसमं कल्कं सर्वस्नेहेऽप्ययं विधिः ।

* * * *

लाजापायसनारिकेलसलिलं मूत्रं जलं काञ्चिकं
द्वात्रिंशत्पलिकं तदर्धमुदितं प्रस्थं रसं चौषद(ध)म् ।
क्षौद्रं . . . . . विंशतिपलं क्षीरं च विंशत्पलं
दध्नः पञ्चकपञ्चगुडपलं सप्तादशं चोच्यते ॥

**End:**

गण्डबेरुण्डरसम्—

द्विनिष्कं जातिलिङ्गं च अमृतं निष्कमेव च ।
. . . . चतुर्निष्कं च शीततोयेन मर्दयेत् ॥

गौरीक्षीरानुपानं च तथा शर्करसंयुतम् ।
माषमात्रां तु गुलिकां तापज्वरनिवारणम् ॥
गण्डबेरुण्डको नाम तरुणज्वरवारणम् ।

* * * *

ब्रह्ममुण्डीवचाशुण्ठीपिप्पलीमधुसंयुतम् ।
सप्तरात्रप्रयोगेण किन्नरः सह गीयते ॥

## No. 13209. रसार्णवः.
## RASĀRṆAVAḤ.

Substance, palm-leaf. Size, 16 × 1⅜ inches. Pages, 115. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Breaks off in the 16th Paṭala.

The headings of the Paṭalas given below indicate the subjects dealt with in the work :—

१. तन्त्रावतारः.
२. रसदीक्षाविधानम्.
३. मन्त्रन्यासः.
४. मूषाग्निवर्णनम्.
५. ओषधिनिर्णयः.
६. अभ्रकादिलक्षणसंस्कारः.
७. रसोपरससंस्कारलोहलक्षणादि.
८. बीजसाधनम्.
९. बिडकल्पः.
१०. रसशोधनम्.
११. बालजारणम्.
१२. रसबन्धनम्.
१३. श्वेतगुञ्जादिविधिः.
१४. शैलोदकादिविधिः.
१५. विह्वास्तम्भनम्.
१६. वज्रादिजारणम्.

**Beginning :**

अधमः खन्यवादस्तु बिलवादस्तु मध्यमः ।
उत्तमो मन्त्रवादस्तु रसवादोत्तमोत्तमः ॥
मन्त्रतन्त्रपरिज्ञाने रसवादस्य मू(दू)षकाः ।
प्रयान्ति नरकं सर्वे छित्त्वा सुकृतसंचयम् ॥
रसविद्या परा विद्या त्रैलोक्येऽपि च दुर्लभा ।
भुक्तिमुक्तिकरी यस्मात्(सा प्र)देया गुणान्वितैः ॥
अस्तीति भाषते कश्चित् कश्चिन्नास्तीति भाषते ।
अस्तीति भाषते यस्तु तस्य सिध्यति भूतले ॥
नास्तिकेन तु वादेन नास्ति नास्तीति यो वदेत् ।
तस्य नास्ति प्रिये सिद्धिः जन्मकोटिशतैरपि ॥
ब्रह्मज्ञानेन मुक्तोऽसौ पापीयान् रसनिन्दकः ।
नाहं त्राता भवेत्तस्य जन्मकोटिशतैरपि ॥
श्वयोन्यां जायते सोऽपि याति जन्मसहस्रकम् ।
रसो वीर्यो विपाके च पारदस्त्वमृतोपमः ॥

* * * *

**Colophon:**

इति रसार्णवे तन्त्रावतारः प्रथमः पटलः ॥

**End:**

इति रसार्णवे रससंहितायां विद्यास्तम्भनं नाम पञ्चदशः पटलः ॥

देव्युवाच—

बद्धस्य रसराजस्य कथं द्रावणमीश्वर ।
वज्रादिजारणं चापि कथमाज्ञापय प्रभो ॥

श्रीभैरव उवाच—

तं खोटं सूक्ष्मचूर्णं तु क्षीरजोभिस्तु भावयेत् ।
पुनर्नवौ द्वौ मीनाक्षीं रम्भाकन्दं स्त्रियो रजः ॥

• • • •

तेनैव रञ्जयेत्पश्चात् सप्तवारं पुनः पुनः ।
लवणोदनिषिक्तं तु लोहसङ्कान्तिनाशनम् ॥
बिडे च गुणे बिडकाचेनाम्लवणेन च ।
विषपित्ताम्लपिष्टेन हन्यात्संकान्तिकालिकाम् ॥
गैरिकं गन्धकं सूतं तिलतैलेन पेषयेत् ।

---

## No. 13210. रसेन्द्रचूडामणिः.
## RASENDRACŪḌAMAṆIḤ.

Pages, 56. Lines, 5 on a page.

Begins on fol 24*a* of the MS. described under No. 13137.

Incomplete.

On the method of preparing certain mercurial medicines together with a statement of various diseases cured by them. There is no authority in the body of the work for the name given to it above.

**Beginning:**

एकभागं रसेन्द्रं च द्विभागं तीक्ष्णलोचकम् ।
गन्धकं च त्रिभागं च कौमारीरसमर्दितम् ॥
अधः तार्क्ष्यपुटं चैव साङ्गुलीतलमुद्धरेत् ।
कृष्णखल्वेन निक्षिप्य त्रिकटुरसमर्दितम् ॥
शोफभ्रमाटरूपं च गोक्षुरामृतभृङ्गकम् ।
सातलार्द्रकवाराही मूर्वा वज्रलता बला ॥

चित्रमूलरसेनैव भावयेत्स पृथक् पृथक् ।
अनुपानेन संसेव्य इदं लोहरसायनम् ॥
क्षयपाण्डुरशोफघ्नं प्लीहागुल्मोदराणि च ।
कामिलाश्वासकासघ्नं विंशतिज्वरनाशनम् ॥

**End:**

वर्षाभूलशुनं चैव स्नुहिक्षीरेण पेषयेत् ।
सूरणाभ्यन्तरे चैव पचेद्गोमयवह्निना ॥
साङ्कचीतकल्कं ज्ञात्वा वटकावनकांकृतेः ।
सर्वे(पि)षा पयसा वापि तक्रेसूक्ष्मोदकेन वा ॥
पञ्चगुल्मं निहन्त्याशु पञ्चशूलं तथैव च ।
यकृति प्लीविकानाहप्लीहोदरमहोदरम् ॥
मूर्वामूलकादहनसूरणवज्रवल्लीतकेण चूर्णकर्व . . . प्रपित्ता ।
गुल्मोदराङ्कुर्मेसगन्धरघ्नं पञ्चाग्निनामा जठराग्निकारणम् ॥

---

## No. 13211. रहस्यौषधम्.

## RAHASYAUṢADHAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 33*a* of the MS. described under No. 3890.

Incomplete.

On details connected with the preparation and use of certain medicinal oils, etc.

**Beginning:**

स्थिरवारे तु साषाढे सूत्रयेद्दौणवाङ्कुरम् ।
उदीचीनं भानुवारे तमादाय भदाहयेत् ॥
एरण्डबीजैस्सूचिस्थैः तैस्तैः स्यान्दितमानयेत् ।
तैलं तमेनं कृत्वा तु करादिषु विलेपयेत् ॥
पातालाञ्जनमित्युक्तं वातं निध्यादिसूचकम् ।
कुरवाख्यशलाटुश्च कृतकं जीर्णवस्त्रकम् ॥

**End:**

भिक्षूत्तमाङ्गपरिकल्पितनामधेयैः तत्पर्णमूलफलदण्डफलादिचूर्णैः ।
तक्रारनालपयसा मधुशर्कराज्यैः षण्माससेवितजनस्य जरादि न स्यात् ॥

त्रवी मुण्डी वचा शुण्ठी पिप्पली मधुसंयुतम् ।
सप्तरात्रप्रयोगेण किन्नरस्वरमुच्यते ॥

---

No. 13212. रुदन्तीकल्पः.
RUDANTĪKALPAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 98*b* of the MS. described under No. 5417.

Complete.

On the preparation of a medicine from the leaves of a plant named Rudanti.

**Beginning:**

कैलासशिखरे रम्ये वेदवृन्दनिषेविते ।
वसिष्ठं मुनिशार्दूलमगस्त्यः परिपृच्छति ॥
दारिद्र्यदुःखमज्ञानं मृत्युव्याधिः प्रदर्शितम् ।
मनुष्याणां हितार्थाय औषधं कथय प्रभो ॥

ईश्वर उवाच—

साधु साधु महाप्राज्ञ सर्वसत्त्वहिते रत ।
कथयामि यथातथ्यं मृत्युदारिद्र्यनाशनम् ॥
ओषधी शृण्विमां क्षेमां मातेव हितकारिणीम् ।
रुदन्ती नाम विख्यातं(तां) मृत्युदारिद्र्यनाशन(नी)म् ॥

**End:**

ग्रहनागपिशाचा वा यक्षराक्षसमर्दनात् ।
विषलेपेन सर्वेषां प्रीत्या विषाणि भवन्ति हि ॥
चणककलाः खदिरमात्रं विचित्रापत्राणि ।
सितपीतरक्तकृष्णा भूमिसमो भवति ॥

**Colophon:**

इति रुदन्तीकल्पस्सम्पूर्णः ॥

---

No. 13213. रुदन्त्यादिकल्पः.
RUDANTYĀDIKALPAḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 16*a* of the MS. described under No. 13077.

Similar to the above. In the end the meaning is given in Telugu.

**Beginning:**

भैरव उवाच—

श्रृणु देविमि(त्वि)दं बाले रुदन्ती नाममूलिकाम् ।
सर्वं सङ्गृह्य यत्नेन छायाशुष्कं च कारयेत् ॥
ततः चूर्णीकृतं देवि तदर्धं शर्करां क्षिपेत् ।
अक्षप्रमाणवटकान् प्रातःकालेषु भक्षयेत् ॥
बहुमूत्रं खण्डमूत्रं बद्धमूत्रं प्रवाहकम् ।
स्रावं सशर्करोपेतं मेहविंशतिनाशनम् ॥
अष्टौ च मूत्रकृच्छ्राणि प्रशस्तं रसबन्धने ।
द्विशतवर्ष(नरो) जीवेत् गृध्रचक्षुर्भवेन्नरः ॥
इदं गुह्यमहं देवि रुदन्तीचूर्णकल्पनम् ।

**End:**

वश्यं पुष्टिबलं प्रमेहहरणं सन्तानवृद्धिप्रद-
मभ्यासेन निहन्ति मृत्युपतितं नानामयध्वंसनम् ।
भूमौ सर्वजनानुरञ्जनकरं श्रीपूज्यपादोदितं
तत्तद्रोगहिता(नु)पानसहितं सम्पूर्णचन्द्रोदयम् ॥

---

No. 13214. रोगनिश्चयः, आन्ध्रटीकासहितः.

RŌGANIŚCAYAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 18 × 1¾ inches. Pages, 36. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Incomplete.

On the diagnosis of diseases.

**Beginning:**

अथातस्संप्रवक्ष्यामि सङ्क्षिप्तं सूक्ष्ममुत्तमम् ।
आयुर्वेदोपदेशेऽस्मिन् ज्वराणां च निगद्यते ॥

* * * *

नानामुनीनां वचने निदानं समासतस्तद्भिषजाभियोगात् ।
सोपद्रवारिष्टनिदानलिङ्गं निगद्यते रोगविनिश्चयोऽग(यम्) ॥

* * * *

नानातन्त्रविहीनानां भिषजामल्पमेधसम् ।
सुखं विज्ञातुमातङ्कमयमेव भविष्यति ॥

* * * *

निदानं पूर्वरूपाणि रूपाण्युपचयस्तथा ।
संप्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् ॥

End :

शिरो लोडयतेऽभीक्ष्णमाहारं नाभिनन्दति ।
कूजन्ति हृष्यते चैव परिनर्तनमीहते ॥
कालं प्रभाषते किंचिदभि(वि)न्यासमुच्यते ।
मत्याख्येयस्स विज्ञेयः कश्चिदेवात्र मुच्यते ॥

* * * *

कलहं प्रभाषते.

---

## No. 13215. रोगसङ्ख्यानिदानम्.
## RŌGASAṄKHYĀNIDĀNAM.

Pages, 37. Lines, 8 on a page.

Begins on fol. 52*a* of the MS. described under No. 13082.

On the diagnosis of the various kinds of ailments mentioned in the Bāhaṭasamhitā.

**Beginning :**

सोमात्माच(कोब)निवारिवायुतपनव्योमामतै(त्मकै)रष्टाभः
शस्योर्ध्वाङ्गजराद्वयार्भकवपुर्भूतोरगादिक्रियाम् ।
योऽष्टाङ्गं विततान शङ्करममुं स्वार्गैः(ङ्गैः) प्रणम्याल्पया
वक्ष्ये वाहटसंहितो(दि)तरूजासङ्ख्यानिदानकमात्(न्) ॥
एकोऽयमानाहगतो नराणां वु(वि)पाच्यु(क्यु)ता(दा)वर्तरुजा सहैका ।
अष्ठीलया च द्विविधोऽस्थिमज्जस्तन्वामयः कामिलया तथैव ॥

**End:**

रूक्षस्स वातादबलस्य वातविट् क्षिप्यते तेन सहैव मूत्रम् ।
प्रवर्तते मूत्रपथेन सार्तिविट्तुल्यगन्धं वद विड्विधानम् ॥

वराङ्गविकृतिनिदानम्—

दैवेनातिरते क्षीणं विषमोत्कटकासनात् ।
जायते च्यवदोषोदीदुष्ट! . . . . . . . ॥

## No. 13216. रोगसङ्ख्यानिदानम्.
## RŌGASAṄKHYĀNIDĀNAM.

Substance, palm-leaf. Size, $11\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 66. Lines, 4 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

Same work as the above.

---

## No. 13217. रोगोत्पत्तिपापचिकित्साविषयः, कर्णाटकटीकासहितः.
## RŌGŌTPATTIPĀPACIKITSĀVIṢAYAḤ WITH KANARESE MEANING.

Substance, palm-leaf. Size, $12\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 9. Lines, 5 on a page. Character, Telugu and Kanarese. Condition, injured. Appearance, old.

Begins on fol. 10*b*. The other works herein are Vaidyarājatantra 1*a*, Vaidyaviṣaya (with Kanarese meaning) 14*b*, Auṣadhayōga (Kanarese) 21*a*.

Deals with the nature of the sinful acts believed to be the remote cause of particular diseases, and with certain miscellaneous medical topics.

**Beginning :**

गवां हत्या वातरोगं ब्रह्महत्या च कुष्ठकम् ।
शिशुहत्या भवेद्गुल्मं भ्रूणहत्या च प्लीहकम् ॥
कृत्रिमं श्वासरोगं च अन्धकौ विष्णुनिन्दकौ ।
आमपीथं(पित्तं)तथा गेहे दाहकं पापकर्मणि ॥
समस्तजीवहिंसानां कासरोगं च(स)मुत्कटम् ।
कान्तारं राजरोगं च हृद्रोगं शिवनिन्दकम् ॥
सुस्रावं च अर्शांसि अकृत्यं गण्डमालकम् ।

**End :**

दुग्धमत्यन्तमधुरं सौम्यं जिह्वनिबर्हणम् ।
स्वरं गुरु वयोवृद्धि बलमेधाविवर्धनम् ॥
जलदोष(ात्)मनुष्याणामामवृद्धिः प्रजायते ।
आमाधिक्येन मन्दाग्निर्मन्दाग्नेरजीर्णसम्भवः ॥
अजीर्णेन ज्वरोत्पत्तिः जायते चोत्तरोत्तरम् ।

## No. 13218. वैद्यग्रन्थः.
## VAIDYAGRANTHAḤ.

Pages, 8. Lines, 12 on a page.

Begins on fol. 24a of the MS. described under No. 13094.
Deals with the description of maladies and their treatment.

**Beginning:**

शूलस्योपद्रवाः—

वदनादितृषा मूर्छा कासश्च गुरुतारुचिः ।
आनाहक्लमहिक्का च शूलस्यैत उपद्रवाः ॥

उदरस्य—

अजीर्णान्मलिनैश्चान्नैर्मन्दाग्नौ मलसंचयात् ।
रुद्ध्वा स्वेदाम्बुवाहादि जनयत्युदरं नृणाम् ॥
आध्मानमग्निमान्द्यं च रतिरल्पा कृशाङ्गता ।
शोभस्वेदनमङ्गानां दाहस्तन्द्रा विवर्णता ॥
सङ्गो विहांश्च पङ्क्तां च श्वयथुश्चाग्रलक्षणम् ।

वातोदरस्य—

तत्र वातोदरः शोभा पाणिवक्त्राभिकुक्षिषु ।
उदरं वातसम्पूर्णं सव्यथं च कृशाङ्गता ॥

**End:**

रसाञ्जनं तु पीताभं नेत्रदोषमलापहम् ।
स्रोतोऽञ्जनं पाण्डुवर्णं चक्षुषोः सर्वरोगजित् ॥
सौवीरं पाटलं नेत्रं मदात्ययविषापहम् ।
अञ्जनानि विशुद्ध्यर्थं भृङ्गस्वरससेचनात् ॥

---

## No. 13219. वैद्यग्रन्थः, आन्ध्रटीकासहितः.
## VAIDYAGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 13⅝ × 1⅝ inches. Pages, 180. Lines, 4 on a page Character, Telugu. Condition, good. Appearance, old.

Incomplete

Gives details for the preparation of certain medical decoctions for curing fever of different kinds, of certain cooling drinks for quenching thirst, etc.

**Beginning:**

धान्यं च मुस्ता त्रिफलं गुडूची पटोलनिम्बा मधुकं च काथम् ।
वातेन पीत्वा मधुशर्कराणां सर्वज्वरं हन्ति त्रिभिर्दिनेषु ॥

* * * *

कण्टकार्यमृता भार्ङ्गी नाग इन्द्रजवाचकम् ।
भूनिम्बा चन्दना मुस्ता पटोलकटुरोहिणी ॥
शर्करामधुसंयुक्तं वातपैत्त्यज्वरं हरम् ।

* * * *

धान्यकं जीरकं व्योषमुशीरं चन्दनं घनम् ।
शीताकर्पूरकं कोष्ठमधुकं च मृणालकम् ॥
पद्मत्वक्पल्लवं पद्मधात्रीफलगुलूचयोः ।
एतेषां दाहशान्त्यर्थमनुपानाः प्रकीर्तिताः ॥

**End:**

शरीरशुष्कं गमनेन श्वासमूरुव्यथानामरुचिं करोति ।
भुक्ते अजीर्णे च क्षुधानुहन्ति नाडीश्च धृत्वास्थिगतज्वराणाम् ॥
अच्युतानन्तगोविन्दनामोच्चारणभेषजात् ।
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥

---

No. **13220.** वैद्यग्रन्थः, आन्ध्रटीकासहितः.

VAIDYAGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 15⅞ × 1½ inches. Pages, 419. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Similar to the work described above.

Name of the scribe: Mājēṭi Sarvēśaliṅga. Date of transcription: Wednesday, the 1st day of the bright fortnight of the Kārtika month in the year Kīlaka.

**Beginning:**

सुश्वेतगुञ्जानेपालं गिरिकन्यारसेन तु ।
तन्मर्थं नाभिलेपेन राजयोग्यविरेचनम् ॥

* * * *

तुत्थमेकं त्रयं तालं शिलाक्षारं चतुर्गुणम् ।
कुमारीरससंपिष्टं कुक्कुटीपुटपालितम् ॥
तुलसीशर्करसंयुक्तं सर्वशीतनिवारणम् ।

**End:**

वाशागळूचीनिर्गुण्डी बृहतीद्वयभृङ्गराट् ।
कासमर्दोऽपि भूनिम्बावर्षाभूवज्रवल्लिका ॥
समूलपत्रं निष्पीड्य कुडुबेन पृथक् पृथक् ।
घृतेनानेन तुल्येन समानानेव पाययेत् ॥
कासान् पञ्चविधान् . . . यानेकदस्त्स्मृतः ।
दशसारमिदं सर्पिः ब्रह्मणा निर्मितं पुरा ॥

---

No. 13221. वैद्यग्रन्थः, आन्ध्रटीकासहितः.

VAIDYAGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 9¼ × 1¼ inches. Pages, 16. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 1*a*. The other work herein is **Rasapradīpikā** (Telugu) 9*a*.

Similar to the work described above.

**Beginning:**

मृतसूतं तथा गन्धं कान्तं चाभ्रकमेव च ।
ताम्रभस्मं कृतं सम्यक् मर्दयित्वा समांशकम् ॥
पुनर्णवीगुलूच्याग्नि . रसा त्र्यूषणं तथा ।
एतेषां स्वरसेनैव भावयेत् त्रिदिनं पृथक् ॥
दत्वा लघुपुटे पाच्या साङ्गशीतलमुद्धरेत् ।
वातराक्षसनामायं वातरोगे प्रयोजयेत् ॥

**End:**

मणिराजमृतं नागं वैगन्धरसं समम् ।
स्वर्णभस्मं गन्धकार्धं तदर्धं करवीरकम् ॥
मु . . . . कुसुमद्रावैः कुमारीरसमेव च ।
जम्बीराम्लेन प्रत्येकं मर्दितं च दिने दिने ॥
मूषायां निक्षिपेत्सर्वं वालुकायन्त्रपाचितम् ।
गुञ्जामात्रप्रयोगेण विंशतिर्मेहकुष्ठकम् ॥
मूत्रकृच्छ्राणि सर्वाणि द्वादशं क्षयमेव च ।
. . .
बालसूर्योदयं नाम अश्विनीदेवनिर्मितम् ॥

No. 13222. वैद्यग्रन्थः, आन्ध्रटीकासहितः.

VAIDYAGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 13½ × 1¼ inches. Pages, 8. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 70*a*. The other work herein is Abhidhānaratnamālā 1*a*.

Similar to the work described above.

**Beginning :**

मृतं सूतलोहप्ररौप्यं समांशं मृतं स्वर्णगन्धं शिलाजिह्विलङ्गे ।
स सर्वं विनिक्षिप्य खल्वे विमर्देत् ततः स्वर्णतैलोद्भवेन त्रिवारम् ॥

* * * *

समस्तेषु योगेषु भूमौ विशेषात् प्रसिद्धिर्महापूर्णचन्द्रोद(यो ऽ)यम् ॥

**End :**

पथ्यं च दधि तक्रं च कदलीफलदाडिमम् ।
जम्बीरादिफलं दद्यात् तिन्त्रिणीफलवर्जितम् ॥

---

No. 13223. वैद्यग्रन्थः, आन्ध्रटीकासहितः.

VAIDYAGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 13¾ × 1¼ inches. Pages, 24. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete.

Gives details on the treatment of asthma, etc., by the inhalation of smoke or vapours of various substances, and also on the preparation of certain medicines, etc.

**Beginning :**

गवां सितानां वातघ्नं कृष्णानां पैत्त्यनाशनम् ।
कफघ्नं रक्तवर्णानां त्रिविधं कपिलापयः ॥

धूमपानम्—

बदरीदलहरितालकव्योपशिलास्मिकम(जतु) ।
राजानं पिष्ट्वा वुटिकाकासान् श्वासान् हन्ति धूमयोगिनः ॥

* * * *

शोषयेदेलि(दाखु)पाषाणं भक्षिकान्ते विपाचितम् ।
याममात्रे समुद्धृत्य सूक्ष्मचूर्णं तु कारयेत् ॥

* * * *

एकमूर्तिरसो नाम शीतज्वरनिवारणः ॥

* * * *

अर्कमूलं शमीपत्रं नृकेशास्सर्पकञ्चुकम् ।
मार्जारचर्मसर्पिश्च धूपनं हितमर्शसाम् ॥

**End:**

वल्लमात्रमौषधं समामदीकयोजये(त्) ?
सन्निपातदोषरोगच्छर्दिशूलप्रशान्तये ।
सूतिकादिवातरोगतापकोपनाशये
सूचिकाभरणयोगमन्त्रिजेन कथ्यते ? ॥

---

No. 13224. वैद्यग्रन्थः, आन्ध्रटीकासहितः.

VAIDYAGRANTHAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 18¾ × 1½ inches. Pages, 37. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 74b. The other works herein are Dravyaniścayasārasaṅgraha (with Telugu meaning) 1a, Nāḍīvijñāna (with Telugu meaning) 65b, Kṣayarōganidāna 93b, Aṣṭāṅgahṛdaya (with Telugu meaning) 97a.

Similar to the above. On the preparation of certain medicines with the help of Haritaki, the supposed divine origin of which is also given.

**Beginning:**

सुरासुरैर्मथ्यमानदण्डेन मन्दराद्रिणा ।
उदयौ पारिजातादिवस्तु जातं हि नामकम् ॥
आधिस्सुस्तदुपादाय स्वर्गलोकं जगाम ह ॥
सुधां पिबत्सु देवेषु वायुनापहृतं तदा ।
ततः पपात सहसा सुधाया बिन्दुसप्तकम् ॥
हिमाद्रौ मेरुशिखरे मन्दरे निषधाचले ।
लोकालोके नीलशैले ह्यौषधं गिरिसप्तके ॥
हेमाद्रावभया जाता रोहिणी मेरुपर्वते ।
मन्दरे पृथुनामामा अमृतं निषधाचले ॥

* * * *

शोधितं गौरिपाषाणं तुल्यं स्याद्भिन्नकद्वयम् ।
तुत्थं भिन्नकमेकं स्यादर्कक्षीरेण मर्दयेत् ॥

मल्लातकांबीजतैलं तुल्यं तुल्येन मर्दयेत् ।
गुडेन पलिकायुक्तं गुलिका मुनिसङ्ख्यया ॥
एकैकं भक्षयेन्नित्यं रसं व्रणविशोधकम् ।
सर्वव्याधिविनिर्मुक्तस्सर्वव्रणविशोधनम् ॥
शाल्यन्नतक्रभुक्तं स्यात् स्नानमुष्णोदकं तथा ॥

**End:**

जीरकं पलिनी कान्तितक्कोलं दारुकारवि ।
सर्वज्वरान्तकमिदं चूर्णमुष्णाम्बुना पिबेत् ॥

---

No. 13225. वैद्ययोगसङ्ग्रहः, आन्ध्रटीकासहितः.

VAIDYAYOGASANGRAHAH WITH TELUGU MEANING.

Pages, 140. Lines, 6 on a page.

Begins on fol. 52a of the MS. described under No. 13129.

Wants the beginning and end.

On the preparation of certain medicines and their efficacy in the treatment of particular kinds of diseases.

**Beginning:**

भस्मेश्वररसः—

एकभागं वत्सनाभं त्रिभागं म(रि)चान्वितम् ।
भस्म षोडशभागं च काननोत्पलसम्भवम् ॥
सूक्ष्मचूर्णं कृतं सर्वं नस्यं स्यात्सन्निपातनुत् ।
अयं भस्मेश्वरो नाम शम्भुना परिकल्पितम् ॥

* * * *

अर्केश्वररसः—

पलमात्रं शुद्धभस्म काननोत्पलकोद्भवम् ।
अर्कक्षीरेण संमर्द्य पादांशं मरिचं क्षिपेत् ॥
सूक्ष्मचूर्णं कृतं सम्यं नस्यं स्यात्सन्निपातजित् ।
अयमर्केश्वरो नाम सन्निपातकुलान्तकः ॥

**End:**

गन्धकं त्रिकटुकं चाब(भ्र) रोहिणी तालकं समम् ।
पञ्चकोलकषायेण मर्दयेद्दिवसत्रयम् ॥

माषयेद्(मूषायां मू)षरे पाच्य साङ्गशीतलमुद्धरेत् ।
मधुना चानुपानोऽयमुळ्वसं च विनश्यति ॥

---

No. 13226. वैद्यराजतन्त्रम्, कर्णाटकटीकासहितम्.

VAIDYARAJATANTRAM WITH KANARESE MEANING.

Pages, 20. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 13217.

Contains the first Karaṇa only.

This work is apparently a comprehensive medical treatise. The portion contained in this MS gives details for feeling the pulse and is stated to have been revealed by Paramaśiva to Pārvatī.

**Beginning:**

कैलासशिखरे रम्ये नानारत्नविभूषिते ।
नानाकल्पद्रुमाकीर्णे गुल्फसम्भावर्जिते ॥

श्रीपार्वत्युवाच—

देवदेव जगन्नाथ देवदेव मम प्रिय ।
देवदेव त्रिलोकेश नमस्ते परमात्मने ॥

लोकानां नाडिशास्त्राणि मम प्रीत्यर्थकारणम् ।
तस्मात्कारण सर्वेश ब्रूहि मे परमेश्वर ॥

श्रीईश्वर उवाच—

साधु साधु महादेवि साधु माहेश्वरप्रिये ।
साधु कल्याणि देवेशि साधु मातङ्गिनि प्रिये ॥

साधु पृष्टं त्वया देवि भक्तानां हितकारणम् ।
नाडीशास्त्रं महेशानि शृणु कौलस्य नायकि ॥

पञ्चभूतात्मको देहः त्रिदोषः सप्तधातवः(तुकः) ।

* * * *

एतानि सर्वदुःखानि प्राणमारुतसम्भवम् ॥
नित्यं प्रवर्तते प्राण इति स्थानं कुतः प्रिये ।

**End:**

पूर्वं पीथ(पित्त)गतिप्रभञ्जनगतिश्लेष्माणमामिप्र(विश्र)ती-
मत्यन्तभ्रमणीं मुहुर्विदधतीं चक्रादिरूढाजि(श्र)वा ।
भीष्मत्वं दधती कलापरहितं सर्वे गतिं चाश्रुतां
नो साध्यं धमनी वदन्ति सुधियो नाडीगतिं ज्ञानिनः ॥

**Colophon:**

इति श्रीपार्वतीसंवादे वैद्यराजतन्त्रे नाडीज्ञानं प्रथमकारणं सम्पूर्णम् ॥

---

## No. 13227. वैद्यविषयः.
## VAIDYAVIṢAYAḤ.

Substance, palm-leaf. Size, 13½ × 1⅞ inches. Pages, 2. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 27*a*. The other works herein are Vaidyaviṣaya (Telugu) 1*a*, Stōtra 25*b*, Balāmantra 29*a*, Mantra 29*a*, Mantra 30*a*, Śabaramantra 31*a*, Stōtra (Telugu) 34*a*.

A treatise dealing with the preparation of medicines and stating the diseases cured by them.

**Beginning:**

प्रस्थं जम्बीरनीरं बदरपरिमृ(मि)तं काकतुण्डीसमूलं
कर्षार्धं स्वर्चिकायां त्रिपटुपलमितं नव्यसारं पलार्धम् ।
तद्गुत्वा सूर्यताप्योमुशिदिनयुगलं काचकुप्यानिधाय
अन्यं तीव्रगुल्मं सतीव्रजतरमपितुजा शङ्खयोर्द्रावनैश्च(?) ॥

**End:**

आमवातं च कुष्ठं च मूत्ररोगांश्च नाशयेत् ।
बलवान् कुरुते नित्यं वाजीकरणमेव च ॥
स्त्रीणां च वल्लभो नित्यं यामं यामं च द्रावयेत् ।
नराणामुपकाराय पूज्यपादेन निर्मितम् ॥

---

## No. 13228. वैद्यविषयः.
## VAIDYAVIṢAYAḤ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 45*a* of the MS. described under No. 13077. Wants the beginning and end.

Deals with the method of preparing medicinal powders, together with directions for taking medicines

**Beginning:**

गर्भयन्त्रं प्रवक्ष्यामि पेष्टकाभस्मकारका ।
चतुरङ्गुलदीर्घं तु त्रिगुणोन्नतविस्तरम् ॥
मृन्मयी सुदृढं मूषा वर्तुलस्य च कारयेत् ।
लवणं विंशतिर्भागं भागं योगं तु गुग्गुलु ॥
शुक्लाक्षपेषयित्वा तु वारं वारं पुनः पुनः ।
मूषालेपं दृढं कृत्वा लवणार्धं मृदाम्बुभिः ।
गर्ते तुषाग्निना भूमौ स्वेदयेन्मृदुमानवत् ।
अहोरात्रं त्रिवारं वा रसेन्द्रो भस्मतां व्रजेत् ॥

**End:**

औषधं सेवयेद्रोगी तस्माद्दक्षिणनायकः ।
वामभागे . . . . पीत्वा अग्निः प्रजायते ॥
तस्मात्तेनैव पार्श्वेन भुञ्जयेत्सुविशेश्वरः ।
औषधं सेवयेद्रोगी मातृभार्याविवर्जितम् ॥
अन्यस्त्रीणां पाकयोम्यमारोग्यं स्याद् द्विजो भिषक् ।
भोजनान्ते रतान्ते च पानीयं प्रभवेश्वरः ॥
तयोराद्यं तयोरन्त्यं जलपानं त्यजेत्सुधीः ।
अन्नं च कुक्षौ द्वौ भागौ पानादेकं प्रपूरयेत् ॥
वायुसंचारणार्थाय चतुर्थमवशेषयेत् ।
कार्पासमेकरात्रं तु काषायं दशरात्रकम् ॥
दुकूलं सप्तरात्रं तु अजिनं तु सदा शुचि ।

---

No. 13229. वैद्यविषयः.

VAIDYAVIṢAYAḤ.

Substance, palm-leaf. Size, 11½ × 1¼ inches. Pages, 40. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 66*a*. The other work herein is Dravyaguṇapāṭha 1*a*.

Gives directions for the preparation of mercurial salts, electuaries, medicinal powders, etc., and for the diagnosis of certain diseases, etc.

**Beginning :**

रसभस्मक्रमः—

पारदं पलमेकं च सैन्धवं च चतुःपलम् ।
इष्टकाचूर्णमेकं स्यान्निष्कार्धं वटकी स्मृता ॥
एतान् संयोज्य कुम्भे तु ऊर्ध्वपातेन पातयेत् ।
तत्क्षणात् जायते भस्म चन्द्रकान्तसमप्रभम् ॥
रसभस्मेति विख्यातं सर्वरोगकुलान्तकम् ।

* * *

रास्ना भार्ङ्गीविषं चव्यं चातुर्जातमरीचकम् ।
मागधीशुण्ठिद्राक्षारेणुक . . . . . ॥
मांसीमञ्जिष्ठमधुकं सम्यक् तालीशपत्रकम् ।
जातीफलं कठोरं च खर्जूरो नीरघा . . . ॥
कर्षमात्रमिदं चूर्णं सम्यग्वस्त्रेण घातितम् ।
चूर्णमर्धमिदं योज्यमश्वगन्धीरजः क्षिपेत् ॥

**End :**

दरदं चूर्णितं कृत्वा शृङ्गिबेरसमर्दनम् ।
भाण्डमध्ये विनिक्षिप्य . . . . . ॥
प्रहृत्यं खर्परं तस्य जलजातं प्रकारयेत् ।
दिवाशी दिवसं प्रोक्तं साङ्गशीतलमुद्धरेत् ॥
पक्षक्लेदमथोयन्त्र पुटपाकविमर्दितम् ।
सर्वकर्माणि दोषाणि निवृत्तिर्जायते दृढम् ॥

---

No. 13230. वैद्यविषयः, आन्ध्रटीकासहितः.

VAIDYAVIṢAYAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 14¾ × 1¼ inches. Pages, 43. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete.

A medical treatise describing the good effect caused by purgatives and other medicines, etc.

**Beginning :**

विरेचनगुणः—

विरेकं शूलशोफं च पाण्डुगाकलि(कामिल)नाशनम् ।
दीपनं पाचनं चैव सर्वपित्तनिवारणम् ॥

టీకా.—వాంతి బ్రాంతిహరం హాలు.

कुष्ठं पीनसरोगं च श्लेष्मयुक्तज्वरापहम् ।
अपस्मारं च पानीयं वान्तिभ्रान्तिहरं शुभम् ॥
अन्नदाहे(तथा)मांसमम्बुदाहे व(च)शोणितम् ।
कामदाहेन चक्षुष्यमनिद्रारोगकारणम् ॥

पञ्चकर्मविवरम्—

वमनं प्रसवं चैव निर्यूहमनवासनम् ।
नस्यकर्म तथा प्रोक्तं कर्म पञ्चविधं बुधैः ॥

**End:**

सूतं गन्धं हृतं तुल्यं विषहिङ्गुलटुम्मकम् ।
निर्गुण्डीस्वरसेनैव याममात्रं तु मर्दयेत् ॥
मुद्गप्रमाणवार्कमर्धे(न)समुपानयेत् ।
तैलाभ्यङ्गं जलस्नानं क्षोभोत्रितकसेवनम् ॥
गात्रे चन्दनलेपं च कुर्यात्ताम्बूलसेवनम् ।
यष्टिमोदफलं चैव वासांसि विविधानि च ॥
राजचण्डेश्वरो नाम साध्यं हन्ति ज्वरं क्षणात् ।

* * * *

श्रीगन्धं समूलम् . . . देवदारुसमूलम् ।

---

No. 13231. वैद्यविषयः, आन्ध्रटीकासहितः.

VAIDYAVISAYAH WITH TELUGU MEANING.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 35. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 19a. The other works herein are Śarīraka 1a, Nāḍicakravidhi 11a, Bhaiṣajyakalpa 17a.

Incomplete.

On the preparation of medicines and on certain details connected with it, such as the proper time for their preparation, the appropriate kind of metallic vessels to be used, etc.

**Beginning:**

अंशेऽप्यनुक्ते विहितं तु मूलं भागेऽप्यनुक्ते समभागयुक्तम् ।
कालेऽप्यनुक्ते दिवसेषु पूर्वं स्वादेऽप्यनुक्ते जलसंयुतं च ॥

कालेऽनुक्ते प्रभातं स्याद्देशेऽनुक्ते जलं भवेत् ।
भागेऽनुक्ते च सौम्ये च पात्रेऽनुक्ते च मृन्मये ॥

पात्रनिर्णयः—

वाते कांस्यं कफे ताम्रं पित्ते स्वर्णं प्रकल्पयेत् ।
लोहाभावे च मृत्पात्रं स्थालीभेदात्प्रशस्यते ॥

* * * *

एकमात्रौषधं योगे यस्मिन् यत्पुनरुच्यते ।
वातजेषु विकारेषु प्राग्भुक्तं व्याधयिष्यते ॥
मध्ये भुक्तं पित्तजेषु भुक्तान्ते कफजेषु च ।
प्रातः सेव्यं तु भैषज्यं जीर्णे नैव प्रशस्यते ॥

**End:**

सर्वेषु सन्निपातेषु रसमानन्दभैरवम् ।
हिङ्गुलं मरिचं गन्धं पिप्पली टङ्कणं विषम् ॥

कनकश्वासभञ्जनरसो नाम—

---

No. 13232. वैद्यविषयः, आन्ध्रटीकासहितः.

VAIDYAVIṢAYAḤ WITH TELUGU MEANING

Pages, 30. Lines, 6 on a page.

Begins on fol. 42a of the MS. described under No. 13181.

Incomplete.

Similar to the work described above.

**Beginning:**

मङ्गलैर्मणिभिर्लक्ष्मीः सोमपुष्पाक्षतादिभिः ।
ताम्बूलदानं सर्वेऽपि तस्मादुक्तं न लङ्घयेत् ॥

* * * *

औषधस्थापनफलम्—

अभ्यर्च्य गन्धपुष्पाद्यैर्भाण्डं धौताम्बरावृतम् ।
गजस्कन्धं समारोप्य पूर्णकुम्भपुरस्सरम् ॥
प्रदीप्तदीपिकाचक्रं प्रथितच्छत्रचामरैः ।
शङ्खदुन्दुभिनिर्घोषैः सर्वतो मुखरीकृतम् ॥

* * * *

अयमेव विधिः कार्यः सर्वारिष्टामयादिषु ।

* * * *

विशेषः पुनरेतेषां विस्तारेणोपदिश्यते ।

*   *   *   *

निर्दिष्टं रिष्टमशुभमरिष्टं रिष्टवर्जितम् ॥

*   *   *   *

अरिष्टमासवं क्षौद्रं गुडं लेह्यं विधीयते ।

*   *   *   *

तत्सान्द्रस्वच्छत्वभेदेन(!) लेह्यपेयमिति द्विधा ॥

**End:**

हरीतकीनां सर्वासामूर्ध्वं मासत्रयात्पुनः ।
क्षौद्रप्रक्षेपणं कार्यं तदा पाकं सुनिश्चितम् ॥

---

No. 13233. वैद्यविषयः, आन्ध्रटीकासहितः.

VAIDYAVIṢAYAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 12 × 1¾ inches. Pages, 332. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Incomplete.

A treatise describing the diagnosis of certain diseases and laying down the method of preparing medicines of various kinds, such as powders, oils, electuaries, etc.

**Beginning:**

शङ्खं चक्रं . . . श्च करयोर्दिव्यौषधं दक्षिणे
वामेशान्ये करेण संभृतसुधाकुम्भं जलूकावटम् ।
बिभ्राणः करुणामृदुः सुखकरः सर्वामयध्वंसकः
सर्वं मे दुरितं छिनत्तु भगवान् धन्वन्तरिः सन्ततम् ! ॥

*   *   *   *

कोट्यर्धत्रयरोमकूपजनितं चाष्टाशतं शल्यकं
नाडी सप्तनवं नखद्वयदशं द्रोणं च मूत्रं मलम् ।
रक्तेनैव शिवद्वयं च सलिलं शुक्लं च कट्वद्वयं
ह्यपित्तं कुडुबद्वयं त्रिकुडुबं श्लेष्मामरुत्पर्वतम् ॥

*   *   *   *

कट्वङ्गं दाडिमं मुस्ता धातकी बिल्वबालुकम् ।
लोध्रचन्दनपादानि कषायं मधुना पिबेत् ।
आमे सशूलरक्ते च अतीसारप्रवाहिकान् ॥

* * * *

कण्ठकूजनसन्नि(पात)निदानम् ।

शिरोतिकण्ठग्रहमोहतापदाहज्वरारोचकवातपित्तः ।

अनुग्रहस्तापविलापमूर्च्छो स्यात्कण्ठकूजः किल कष्टसाध्यः ॥

* * * *

रसभूपतियोगः—

तुल्यौ पारदगन्धकौ मधुकरं तुल्योऽश्वतुल्यं तयोः

खल्वे हंसपदीरसाद्दिनयुगं संमर्दयेत् तादृशम् ।

पिष्ट्वा काचघटे वटीकृतवतस्सूतांशशुल्वेन तत्

कुप्यास्यं विनिरुध्य वासरयुगं गाढाग्निमुद्दीपयेत् ॥

**End:**

श्वेतगुञ्जार्कसंयुक्तं शमीबीजेन मासतः ।

आत्मासर्वसमं तोयं पिता पुत्रेण मोहिनी ॥

द्रावि द्रावि महाद्राविं मधुकर्पूरटङ्कणम् ।

---

No. 13234. वैद्यविषयः, आन्ध्रटीकासहितः.

VAIDYAVIṢAYAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 59. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Gives the treatment of diseases and the method of preparing certain medicines, etc.

**Beginning:**

भगन्धरचिकित्सा—

गुदस्य द्व्यङ्गुले भागे दीपकः स्याद्भगन्धरः ।

विशेषात्प्राणनिर्दिष्टं तत्र कार्यं विजानतः ॥

* * * *

उदयमार्ताण्डरसः—

पारदं द्विगुणं गन्धं गन्धतुल्यने तालकम् ।

तालकं च शिलायोज्यं शिलाद्विगुणहिङ्गुलम् ॥

हिङ्गुलार्धं मृतं ताम्रं ताम्रतुल्येन टङ्कणम् ।

टङ्कणं छत्रिणं व्योषं व्योषद्विगुणममृतम् ॥

अर्कमूलकषायेण दिव्यमार्ताण्डनामयो(युक्) ।

गुञ्जाप्रमाणं वटकः सन्निपाताः त्रयोदश ॥
सर्वरोगं निहन्त्याशु सर्वानुपानसम्मतम् ।

**End:**

विश्वं धान्यगुडं चिश्वा समुस्तोशीरचन्दनैः ।
क्वाथं क्षौद्रेण संपीत्वा तृतीयज्वरसाधनम् ॥

* * * *

धात्रीविलङ्गं त्रिकटुं च मुस्ता व्योषश्च पथ्या त्रिवृतत्रिभागम् ।
चूर्णं समं शर्करया समेतमुष्णोदकेन पिबते नराणाम् ॥

---

No. **13235.** वैद्यविषयः, कर्णाटकटीकासहितः.

VAIDYAVIṢAYAḤ WITH KANARESE MEANING.

Pages, 2. Lines, 8 on a page.

Begins on fol. 140*a* of the MS. described under No. 2421.

Similar to the above; with Kanarese meaning.

**Beginning:**

दुर्गन्धे चर्मति(देहे) व्रणमु(जु)षि सुषिरे मूत्ररेतःप्रवाहे
मांसासृक्कर्दमार्द्रे क्रिमिकुलनिचये दुर्गमे दुर्निरीक्ष्ये ।
विष्ठाद्वारोपकण्ठे गुदविवरगलद्वायुधूमात्तधूपे
कामान्धाः कामिनीनां कटितटनिकटे गर्तवत्युत्थमोहाः ॥
कल्कं वरालकणदीप्यकबिल्वशुण्ठी मोचास्थिधात(कि)ससैन्धवजीरकाणाम् ।
तक्रेण चैव न(व)नाथमपाकरोति सर्वातिसारमरुचिं ज्वरमाशु पीतम् ॥
दाडिम्याम्रकपित्थबिल्वफलकं मोचारसं धातकी
साजामोदकशुक्रकन्दकटुजासाविश्वमारग्वधम् ।
मुस्तादीप्यकमिन्द्रणाह्विचरणालोध्रं सह्रासं(युतं)
दाडिम्यादिगणा दशाष्टकमिदं सेव्यं दधि माहिषम् ॥

**End:**

अजीर्णवातं गुदगुल्मवातं वातप्रमेयं(हं)विषमं च वातम् ।
विषूचिकाकामिलपाण्डुरोगं श्वासं च कासं च हरिप्रणीतम् ॥

---

No. **13236.** वैद्यविषयः, कर्णाटकटीकासहितः.

VAIDYAVIṢAYAḤ WITH KANARESE MEANING.

Pages, 18. Lines, 5 on a page.

Begins on fol. 14*b* of the MS. described under No. 13217.

On the treatment of maladies affecting the eyes, the head, the stomach, etc., and of certain loathsome diseases, such as leprosy, etc.

**Beginning:**

नञ्जुण्डेशमितिख्यातं लोकेषु [प्रार्थि]वाञ्छित(प्रदम्) ।
कुक्षिरोगशिरोरोगनेत्रशूले भगन्धरः ॥
एतेऽपस्मारकुष्ठादिकर्णजा दोषजापि वा ।
तत्स्थानमृत्तिकास्पर्शात् सद्यो नश्यन्ति(न्त्य)संशयः ॥
वर्षादौ देवकुसुममीश्वरी सहजेरिता ।
वन्ध्या कर्कोटकी धान्यं वचात्वकु(ष्ठ)नागरम् ॥

**End:**

मुस्त्येलाग्निविलङ्गयष्टिरजनीमाञ्जिष्ठपाठावचा
शुण्ठी रोहिणिका फलत्रयवृषा मृद्वीकदार्वीयुतम् ।
गव्येषु प्रतिपादितं घृतमिदं शान्तिप्रदं पुष्टिदं
पुत्रायुष्यकरं महाग्रहहरं भूतामयघ्नं परम् ॥

---

No. 13237. वैद्यविषयः, आन्ध्रटीकासहितः.

VAIDYAVIṢAYAḤ WITH TELUGU MEANING.

Pages, 200. Lines, 6 on a page.

Begins on fol. 137*a* of the MS. described under No. 1724

Incomplete.

Deals with the preparation of various medicines with an enumeration of the diseases cured by them.

Foll. 38 to 157 contain in Telugu the process of preparing certain medicines.

**Beginning:**

रसहिङ्गुलतालैश्च कान्तं कनकमभ्रकम् ।
माक्षिकं कुनटी गन्धं ताम्रं नेफालतुत्थकम् ॥
सैन्धवं खाखुपाषाणं पिप्पलीमरिचटङ्कणम् ।

* * * *

त्रिकटुकं सर्षपं च अजामोदं हरीतकी ।
जीरकं च समोपेतं तिलतैलेन पेषयेत् ॥

* * * *

कवलग्रहप्रमाणेन आर्द्रक्षौद्रेण संयुतम् ।
वातपैत्त्यश्लेष्मपैत्त्यसर्वपैत्त्यकुलान्तकम् ॥

**End:**

विडालमूषकः सर्पवृश्चिकः कुक्कुटश्च सः ।
मर्कटीधूतचिह्नानि ज्वरैते मरणान्तिकम् ॥
कृष्णकल्पे बलारोग्यं श्वेतकल्पे बलक्षयम् ।
रक्तकल्पे त्रिदोषघ्नं पीतकल्पे त्रिदोषजित् ॥
लोहजह्वादिनिर्मुक्तं कान्तकल्पे विशेषतः ।

---

No 13238. वैद्यविषयग्रन्थः, आन्ध्रटीकासहितः.

VAIDYAVIṢAYAGRANTHAḤ WITH TELUGU MEANING.

Pages, 5. Lines, 6 on a page.

Begins on fol 25a of the MS. described under No. 13174.

Incomplete.

Gives details regarding the worship to be conducted at the time of the preparation of medicines, etc.

**Beginning:**

अतः परं प्रवक्ष्यामि रहस्यं भेषजोत्तमम् ।
औषधारम्भसमये पुटपाकान्तरेऽपि च ॥
रसशुद्धिकृताकारि आदौ पूज्यो गणाधिपः ।
रसपूजा ततः कुर्यादघोरागममन्त्रगैः ॥

* * * *

ब्राह्मणान् भोजयेद्विद्वानौषधं पञ्चभागकृत् ।
धर्मभागं मित्रभागं द्रव्यभागं दशांशकम् ॥
एकं धन्वन्तरीभागं वैद्यानां ददते नृपः ।
एवं न कुर्याल्लोभेन चिकित्सा निष्फलं भवेत् ॥

**End:**

पद्मं सुगन्धिकं कुष्ठा धात्रीकतकसमन्वितम् ।
शर्कराद्विगुणं चैव भक्षयेच्छीतवारिणा ॥
हस्तपादाङ्गदाहेषु नेत्रदाहं विशेषतः ।
पैत्यमूर्च्छाज्वरो हन्ति . . . . चन्द्रभाषितम् ॥

---

No. 13239. वैद्यसारसङ्ग्रहः.

VAIDYASĀRASAṄGRAHAḤ

Substance, palm-leaf. Size, 13¾ × 1¾ inches. Pages, 142. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance old.

Wants the beginning and end.

A medical treatise on diseases and their treatment. In the beginning the different varieties of fever are described.

**Beginning:**

वातज्वरो वातपित्तज्वरः श्लेष्मज्वरस्तथा ।
वातपित्तज्वरः श्लेष्मवातजं श्लेष्मपित्तजम् ॥
सन्निपातज्वरागन्तुज्वरं दाहादिकज्वरम् ।
पित्तज्वरं चाभिन्यासं कण्ठकुब्जहुताशनम् ॥
ततः प्रायोत(स्त्रायोदशं)जं दोषं पाकज्वरहरं परम् ।
तत्र ज्वरं च विततं ज्वरं चैव प्रलापकम् ॥
वैकस्यामं चाभिघातं ज्वरं चैव विषम्वरम् ।
तापज्वराभिघातं च महावेशज्वरं तथा ॥

**End:**

खदिरं सारचूर्णं च कुडुपद्वयनिक्षिपेत् ।
नारिकेलस्य पानीयं भावयेद्दिवसाष्टकम् ॥
तद्विषं क्षीरमाब्यो ऽयं मर्दयेत्तद्विषं क्रमात् ।
आ . . . . . क्षिपेत्तसं सूक्ष्मचूर्णं निघापयेत् ॥
वरालं मधुकं कुष्ठं कस्तूरीकुङ्कुमं हिमम् ।
जातीफलं जातिपत्रं ये . . . . . . . . ॥

---

No. 13240. वैद्यसारसङ्ग्रहः, कर्णाटकटीकासहितः.

VAIDYASĀRASAṄGRAHAḤ WITH KANARESE MEANING.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 107. Lines, 7 on a page. Character, Nandināgarī and Kanarese. Condition, injured. Appearance, old.

Incomplete.

Similar to the above. In the beginning the method of examining the patients, with a view to diagnosing the diseases, is given.

**Beginning:**

सारः सर्वेषु रोगेषु नाडी जिह्वा च मूत्रकम् ।
परीक्षेत् सततं वैद्यो(द्य)स्तद्विधानं निगद्यते ॥
करं तु दक्षिणं पुंसां वामबाहौ तु योषिताम् ।
प्रकोष्ठमणिबन्धाधः साराणिक्षित्रिरङ्गुलैः ॥

* * * *

शिवशक्त्यात्मकत्वाच्च पुरुषाणां च योषिताम् ।
शिवांशो दक्षिणो भागो वामभागस्तु शक्तिजः ॥
तस्मात् पुंसां दक्षहस्ते वामे स्त्रीणां परीक्षयेत् ॥

**End:**

उत्तराभाद्रपद्यां वै अष्टाविंशतिरात्रकम् ।
अहिर्बुध्न्यां भवेद्रावो गन्धमाल्यैर्बलिं हरेत् ॥

* * * *

त्रिदिनं(विषं) जन्म(नि)धनं प्रत्यमा(रा)ख्ये विपत्करे ।
नक्षत्रे व्याधिनः पुंसः क्लेशाय मरणं यथा ॥

---

## No. 13241. वैद्यसारसङ्ग्रहः.
## VAIDYASĀRASAṄGRAHAḤ.

Substance, palm-leaf. Size, 14¾ × 1¼ inches. Pages, 550. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, old. Incomplete.

Similar to the above.

**Beginning:**

समुद्रं सैन्धवं काचं बिन्दुसौवर्चलं तथा ।
टङ्कणं सान्धिकक्षारं तुल्यं चूर्णं विपाचयेत् ॥

* * * *

हिङ्गुलं च विषं व्योषं टङ्कणं मागधीक्षुमम् ।
स्वरणपिष्टं गुञ्जयुक्तं रसमानन्दभैरवम् ॥

**End:**

शोफष्ठीहोदराग्निज्वरमदविषमं गुल्मशूलामवाता
. . . . . . . मिति रचितमिदं भाषितं पूज्यपादैः ।

---

## No. 13242. व्रणचिकित्साग्रन्थः.
## VRAṆACIKITSĀGRANTHAḤ.

Pages, 7. Lines, 25 on a page.

Begins on fol. 122b of the MS. described under No. 13056.

Wants the beginning and the end.

Deals with the treatment of wounds, etc., and the surgical operations connected therewith.

**Beginning :**

उदयं शस्त्रकालेऽपि मध्याह्ने शृङ्गकालयेत् ।
अपराह्ने जलूकाभिः त्रिविधं रक्तमुच्यते ॥
शृङ्गं षडङ्गुलं रक्तं जलूकं द्वादशाङ्गुलम् ।
शस्त्रमङ्गुलमात्रेण ब्रह्मणा निर्मितं पुरा ॥

पक्वापक्वनिदानम्—

कूर्माकारं च पक्वानि मत्स्याकारमपक्वकम् ।
बर्बरं च महाघोरं शस्त्रकर्म परीक्षयेत् ॥
श्वेतं च चर्मकुष्ठं च नेत्रवायुधनञ्जयः ।
डमरुकः स शिरोवायुः सर्पमार्जारदाश्वकम् ॥

**End :**

गुग्गुलुदशिगोदन्तस्वर्णक्षीरीकपोतविट् ।
त्रिवृद्दन्तीनिम्बपत्रलाङ्गलीमधुसैन्धवैः ॥
व्रणं विशोधयेद्दक्षं सूक्ष्मस्थान् सन्धिमर्मगान् ।

---

## No. 13243. शारीरम्.
## ŚĀRĪRAM.

**Pages, 19. Lines, 5 on a page.**

Begins on fol. 1a of the MS. described under No. 13231.
Contains the following Prakaraṇas :—

१. चक्राध्यायः.
२. पिण्डोत्पत्तिः.
३. गर्भोत्पत्तिः.
४. त्रिदोषोत्पत्तिः.
५. मर्मस्थानानि.

A medical treatise dealing with the development of fœtus in the womb and with the various kinds of ailments which a human being is subject to and their origin.

**Beginning :**

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युः तं नमामि गजाननम् ॥
षट्चक्रं षोडशाधारं त्रिलक्ष्यं व्योमपञ्चकम् ।
स्वदेहे यो न जानाति कथं वैद्यः स उच्यते ॥
आधारं गुदमूर्ध्वं च स्वाधिष्ठानं च लिङ्गकः ।

मणिपूरं नाभिमध्यमनाहतं हृदस्तथा ॥
विशुद्धं कण्ठदेशे तु आज्ञास्थानं भ्रूवोदिशः(?) ।
ये ते षट्चक्रस्थानं च ज्ञात्वा वैद्यः स उच्यते ॥

*    *    *    *

रोमं मांसम् अस्थि चैव नाडी चर्म तथैव च ।
एतेषु पृथिवी गुण्यं शारीरेण स उच्यते ॥
मूत्रश्लेष्म स्वेदकं च रक्तं शुक्लं च दीपिका ।
एतेषु(षा)मुदकं गुण्यं शारीरेण स उच्यते ॥

*    *    *    *

**Colophon:**

इति शारीरकग्रन्थे चक्राध्यायः सम्पूर्णः ॥

अथ पिण्डोत्पत्तिप्रकरणम्

पश्चाद्दशाधिकं पीतं मासमेकं शिरोद्भवम् ।
द्विमासं बाहुयुग्मं च त्रिमासं चोदरं भवेत् ॥
चातुर्मासं तु सर्वाङ्गं जीवपूर्णं तु पञ्चमम् ।

**End:**

एक एकेन दोषेण त्रयो दोषत्रयोद्भवम् ।
त्रिदोषरविजैकश्च इति सप्तविधा मतः ॥
शिरोरोगाष्टशतकं चक्षूरोगाष्टविंशतिः ।
दन्तरोगाश्च पञ्चैते श्लेष्मदशशताश्च सा ॥
कर्णरोगा दश प्रोक्तं कण्ठेऽशीतिगतायुषाः ।
वक्षस्स्थले च त्रिदशं हृदले सहस्रपञ्चकम् ॥
नाभित्रीणि सहस्रं च पादे द्विशतपञ्चकम् ।
चर्मे दशषडां भेदा मांसे रक्तगता शतम् ।
हस्ते रोगाश्च पञ्चैते मयष्टदशविंशतिः ! ।
शुक्लसप्तदशं वायू(यो)रोगकान्तशरीरभृत् ॥

---

**No. 13244.** सकलरोगचिकित्साग्रन्थः, आन्ध्रटीकासहितः.

**SAKALARŌGACIKITSĀGRANTHAḤ WITH TELUGU MEANING.**

Substance, palm-leaf. Size, 13⅞ × 1¼ inches. Pages, 302. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

On the preparation of medicines for various kinds of diseases.

**Beginning:**

पिप्पली पिप्पलीमूलं समं शुण्ठीविभीतकम् ।
कर्षैकं मधुना लेह्यं सर्वकासापनुत्तये ॥
अर्कैरण्डस्य पत्राणां रसं पीत्वा स कासजित् ।
मरीचं च पुराणाज्यं न क्षौद्रं कासजिद्भवेत् ॥
दाडिमं त्रिफलाव्योषं त्रयाणां च गुडं समम् ।
चूर्णितं भक्षयेत्कर्षं सर्वकासापनुत्तये ॥

**End:**

शिग्रुपुष्परसो मर्द्य वटकान् गुञ्जमात्रकम् ।
एकमात्रेण भुक्तं वा वातातीसारनाशनम् ॥
स्त्रीदोषं वातदोषं वा सर्वदोषनिवारणम् ।
शाम्भवीरसविख्यातः सर्वरोगकुलान्तकः ॥

---

No. **13245.** सद्वैद्यजीवनम्.
SADVAIDYAJĪVANAM.

Pages, 33. Lines, 6 on a page.

Begins on fol. 25*a* of the MS. described under No. 13090.

Contains the Ullāsas one to five complete.

Same work as that described under No. 53 on pages 26 and 161 of M. Seshagiri Sastri's Report No. 1.

---

No. **13246.** सद्वैद्यजीवनम्—आन्ध्रटीकासहितम्.
SADVAIDYAJĪVANAM WITH TELUGU MEANING.

Substance, palm-leaf. Size, 12⅜ × 1¾ inches. Pages, 32. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Wants the beginning and the end.

Same work as the above.

---

No. **13247.** सद्वैद्यजीवनम्.
SADVAIDYAJĪVANAM.

Substance, paper. Size, 8¼ × 6½ inches. Pages, 56. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Nidānaviṣaya 29*a*.

Contains the following Ullāsas :—

१. ज्वरप्रतीकारः.
२. ग्रहिणीप्रतीकारः.
३. कासश्वासविलासिनीकुसुमरोगप्रतिकारः.
४. राजयक्ष्मप्रतीकारः.
५. अनुपानादिविधानम्.

Same work as the above.

---

No. **13248.** सन्निपातचन्द्रिका, पदचन्द्रिकाव्याख्यासहिता.

SANNIPĀTACANDRIKĀ WITH THE COMMENTARY PADACANDRIKĀ.

Substance, paper. Size, 8 × 4½ inches. Pages, 29. Lines, 12 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old. Incomplete.

This work gives the characteristics and other details regarding सन्निपातज्वर or cephalitis, such as its duration, etc., and also the mode of treatment of it. The commentary is by Māṇikya, son of Padmanābha

**Beginning:**

. . . . . साम्यं स्यात्पात्रेऽनुक्ते च मृन्मयम् । एवं पानमानादिकमपि चान्यता बोद्धव्यम् ।

(मू) अमृतारुरुककरास्ना सुरतरुविश्वा हरीतकीकाथः ।
सकलसमीरणरोगान् प्रातः पीतो हरेत्सद्यः ॥

(व्या) अमृता गुडूची रुरुकमेरण्डमूलम् अङ्गे अनुक्ते जटा भवेत् इति वचनात् रास्ना प्रसिद्धा सुरतरुः विश्वा शुण्ठी हरीतकी प्रसिद्धा एषां काथः

* * * *

**Colophon:**

इति सन्निपातचन्द्रिकायां सन्धिकसन्निपातचिकित्सा प्रथमं प्रकरणम् ॥

(मू) दाहं करोति परितापनमातनोति मोहं ददाति तुदतीति शिरःप्रकम्पम् ।
हिक्कां करोति श्वसनारुचिमङ्गभङ्गं जानीहि तं विबुधवर्जितमन्तिकस्स्यात् ॥

(व्या) अथ त्रिकसन्निपातलक्षणमाह—दाहेति । दाहः प्रतीतः तं करोतीति पुनः परितापनमातनोति परितापनं सन्तापः ।

**End:**

अथ सन्निपातावधिमाह—

(मू) सन्धिके सप्तदिवसानन्तिके दशवासराः ।
रूग्दाहे विंशतिर्ज्ञेयास्त्रीण्यब्दानि च जिह्वगे ।

शीतगे पक्षमेकं तु तान्द्रिके पञ्चविंशतिः ।
हारिद्रे वासराः सप्त कण्ठकुब्जे त्रयोदश ॥
कर्णके तु त्रयो मासा भुग्ननेत्रे दिनाष्टकम् ।
रक्तष्ठीवे दशाहानि प्रलापाख्ये चतुर्दश ॥
जिह्वगे षोडशाहानि अभिन्यासे तु पक्षकम् ।
परमायुरिति प्रोक्तं तदर्वाग्वा मृतिर्भवेत् ॥

(व्या) वा पक्षान्तरं, तदर्वाग्वा मृतिर्भवेद्वा पक्षान्तरे तदवधेर्वा मृतिर्मरणं भवेत् । सान्धियुग्मम् ।

टिप्पणं सन्निपातादेर्माणिक्येन कृतं खलु ।
पद्मनाभात्मजेनैषा नामतः पद्चान्द्रिका ॥

**Colophon:**

इति सन्निपातचन्द्रिकायां सन्निपातार्णवः समाप्तः ॥

---

No. **13249.** सन्निपातादिरोगनिदानम्.
SANNIPĀTĀDIRŌGANIDĀNAM.

Substance, palm-leaf. Size, 13⅝ × 1½ inches. Pages, 61. **Lines, 7 on a** page. Character, Kanarese. Condition, slightly injured. **Appearance,** old.

Begins on fol. 1*a*. The other work herein is **Aṣṭāṅgahṛdaya 32*a*.** Incomplete.

On the diagnosis of the different varieties of सन्निपातज्वर or cephalitis.

**Beginning:**

कण्ठकुब्जा—

मूर्छामोहप्रलापप्रपतनगुरुतादाहसन्तापकम्प-
दाहः कर्णार्तिमोक्षौ गलहनुयुगलस्तम्भनं मस्तकार्तिः ।
कण्ठश्शूकैरिवार्तः प्रबलतरलसद्वातपित्ते बलासि
मन्दे स्यात्कण्ठकुब्जेत्यधिकदशदिनं मोचनाकष्टसाध्ये ॥
आद्यं श्लेष्मप्रमाणं श्वसनकसनसर्वाङ्गरुक्शोफदाहः
श्लेष्मस्तापो विनिद्रा तनुविगलबलं सन्धिबन्धाङ्गभङ्गः ।
स्वल्पभ्रान्तिर्विशेषाच्छिथिलतरतनुः श्लेष्मवाते प्रकुपे
मन्दे पित्ते सुसाध्ये मुनिदिवसगतिः सन्धिगे सन्निपाते ॥

**End:**

रोगिणः काल आक्रान्त्या चिरं क्रीडां करोति च ।
बिन्दुस्तरति नोन्मज्जेत् भ्रान्तश्चोपरि सर्वतः ॥
न जीवति ध्रुवं रोगी यदा सर्वज्ञभाषितम् ।
तैलबिन्दुर्यदा मूत्रे चालिनी सदृशो भवेत् ॥
स प्रेत एव विज्ञेयः ध्रुवं वैद्यविशारदैः ।
शस्त्रं खण्डं धनुर्दण्डं त्रिशूलं मुसलं हलम् ॥
तैले च लगुडाकारं श्मशानं तत्क्षणाद्भवेत् ।
हंसनाकश्च सम्पूर्णं तटाकं दृश्यते यदि ॥
पद्मरूपं फलाकारं तैलबिन्दुश्रियायुषम् ।

---

No. 13250. सारस्वतघृतादियोगः, आन्ध्रटीकासहितः.

SĀRASVATAGHṚTĀDIYOGAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 10⅞ × 1¼ inches. Pages, 22. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Incomplete.

On the process of preparing of a medicinal ghee named Sārasvataghṛta which is considered to be efficacious in enabling one to speak clearly.

**Beginning:**

समूलपत्रमादाय ब्राह्मीं प्रक्षाल्य वारिणा ।
उलूखलेन सम्पीड्य रसं वस्त्रेण गोलयेत् ॥
चतुर्गुणं रसे तस्मिन् घृतप्रस्थं विपाचयेत् ।
हरिद्रामल्कलं चैव चन्द्रिनामाभयं तथा ॥
एतेषां पलिकान् भागान् शेषेण पलिकान् क्रमात् ।
* * * *
एतत्सर्वं समालोड्य शनैर्मृद्वग्निना पचेत् ।
ततः प्राशितमात्रेण वाक्सिद्धिर्विजायते ॥

**End:**

हिङ्गुग्रगन्धाविडशुण्ठिजाजीहरीतकीपुष्करमूलकोष्ठम् ।
भागोत्तरं चूर्णितमेत(व) पिष्टं हिङ्ग्वष्टकं गुल्मगेद ग्रहिण्याम् ॥

No. 13251. सिद्धयोगः.
SIDDHAYOGAḤ.

Pages, 84. Lines, 12 on a page.

Begins on fol. 99a of the MS. described under No. 13094.

Breaks off towards the end of the Viṣādhikāra (the 68th chapter). Wants three leaves in the middle.

A treatise on the treatment of diseases. It consists of 82 chapters according to the printed edition published in the Ānandāśrama Sanskrit Series. The author is Bṛndamuni. The work is also called Bṛndamādhava, apparently from the name of the auhor. According to the India Office Library Catalogue, he refers to the Rugviniścaya of Mādhava.

**Beginning:**

ध्यात्वा मतं परमतत्त्वविचारवैद्यमात्रेयमुग्रतपसं मनसा प्रणम्य ।
नानामतप्रथितदृष्टफलप्रयोगप्रस्तावबान्सह(वाक्यस)हितैरपि सिद्धयोगः ॥
वृन्देन मन्दमतिनात्महितार्थिनायं संलिख्यते गदविनिश्चयजक्रमेण ।
(रोगमादौ) परीक्षेत ततोऽनन्तरमौषधम् ।
ततः कर्म भिषक्तच ज्ञानपूर्वं समादिशेत् ॥
यस्तु रोगमविज्ञाय कर्माण्यारभते भिषक् ।
पुण्यौषधिविधानज्ञस्तस्य सिद्धिर्यदृच्छया ॥
यस्तु रोगविशेषज्ञः स हि भैषज्यकोविदः ।
देशकालप्रमाणज्ञः तस्य सिद्धिर्न संशयः ॥
आदावतो रुजाज्ञानप्रयत्नेन चिकित्सकः ।
साध्यासाध्यविशेषज्ञः ततः कुर्याच्चिकित्सितम् ॥
नास्ति रोगो विना दोषैः यस्मात्तस्माद्विचक्षणः ।
अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत् ॥

* * * *

व्यायामं च व्यवायं च स्नानं चक्र(ङ्क्र)मणानि च ।
ज्वरमुक्तो न सेवेत यावन्न बलवान् भवेत् ॥

**Colophon:**

इति ज्वरचिकित्सा ॥

**End:**

वचाहिङ्गुविडङ्गानि सैन्धवं गजपिप्पली ।
पाठा प्रतिविषा व्योषं कश्यपेन विनिर्मितम् ॥

दशाङ्गमगदं पीत्वा सर्वकीटविषं जयेत् ।
कीटदष्टविषाः सर्वे समानाः स्युर्जलौकसाम् ॥
नेत्रं जर्जरपाणिश्च चरेद्रात्रौ तथा दिवा ।
सच्छायाः शब्दवित्रस्ताः प्रणश्यन्तीह पन्नगाः ॥

वर्ज्यः ॥

विरुद्धाध्यशनक्रोधक्षुद्भयायासमैथुनम् ।
वर्जयेद्विषमुक्तोऽपि दिवा स्वप्नं विशेषतः ॥
सोत्कम्पः पुल.

---

## No. 13252. सिद्धसारसंहिता.
## SIDDHASĀRASAṀHITĀ.

Substance, palm-leaf (Śritāla). Size, 13½ × 1⅝ inches. Pages, 168. Lines, 7 on a page. Character, Kanarese. Condition, good. Appearance, old.

Wants the beginning and end.

Same work as that described under R. No. 799 of the Triennial Catalogue of MSS., Vol. I, Part I-C, which was restored from this MS.

---

## No. 13253. सूतप्रदीपिका.
## SŪTAPRADĪPIKĀ.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 98. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete.

On the preparation of certain mercurial medicines.

**Beginning:**

बिभ्राणं शुभ्रवर्णं द्विगुणवनभुजं पञ्चवक्त्रं त्रिनेत्रं
दानं सूतेन्द्रशस्तं सममहिमधृतं शङ्खभैषज्यचापम् ।
शूलं खट्वाङ्गबाणं डमरुमसिगदे वह्निमारोग्यमालां
सर्वाभीतिं च दोर्भ्यां भजत रसा महाभैरवं सर्वसिद्धौ ॥
अस्ति नीहारनिलयो महानुत्तरदिङ्मुखः ।
उत्तुङ्गशृङ्गसङ्घातलङ्घिताभ्रो महीधरः ॥
धर्मज्ञैर्हिमवत्तल्पैः विजरतैर्भूपैर्महासाधकः
सम्यग्दिव्यरसायधीन(नादि) सततं कल्पान्तसीमावधि(भिः) ।

रक्षेत् देहमनन्तपुण्यनिचयैः मुक्तिश्च यस्माद्भवेत्
तद्वक्ष्ये परमाद्भुतं सुखकरं साम्राज्यदं धीमताम् ॥
मूर्छापक्षक्लेदविशेषदोषं लोहौघयं दाह्यमृतस्थिरं च ।
एतद्गुणं व्यस्तगुणं रसेन्द्रं दीर्घायुरारोग्यकृतं भजध्वम् ॥

**End:**

सर्वाणि तिक्तानि समीरणानि अम्लानि सर्वाणि च पित्तहानि ।
मधूनि सर्वाणि कफानि हन्ति पटोलमत्स्यामलकौ च पथ्यम् ॥

* * * *

अलर्ककुसुमं पत्रं फलं च कटुतिक्तकम् ।
कासश्वासहरं पथ्यं व्रणघ्नं दीपनं लघुः ॥

---

## (C) MATERIA MEDICA.

---

### No. 13254. अभिधानचूडामणिः.
### ABHIDHĀNACŪḌĀMAṆIḤ.

Pages, 204. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 13157.

Contains the Vargas 1 to 7 and 11 to 16 complete and the 17th incomplete.

A dictionary of materia medica: by Narasiṁha Paṇḍita, pupil of Śrīkaṇṭha, son of Īśvarasūri. The work is also called Rājanighaṇṭu or Nighaṇṭurāja. The author states that he consulted various dictionaries, such as the Dhanvantarinighaṇṭu, the Madananighaṇṭu, the Halāyudhanighaṇṭu, the Amarakōśa, etc.

**Beginning:**

श्रीकण्ठाचलमेखलापरिणमत्कुम्भेन्द्रबुद्ध्या रथ-
प्रान्तोत्तम्भितसंहताब्दगलितैः शीतैरपां शीकरैः ।
निर्वाणा मदसंक्षये प्रमुदितास्तेनातपत्रश्रियं
तन्वानेन निरन्तरां दिशतुनः श्रीविष्णुराजो मुदम् ॥
कर्पूरक्षोदगौरं धृतकपिलजलं(टं) तीक्ष्णचन्द्रार्धमौलिं
सौगन्धं च कुरङ्गं वरयुतमभयं दोश्चतुष्कैर्दधानम् ।

वामोत्सङ्गे वहन्तं विविधमणिगणालंकृतामुज्ज्वलाङ्गीं
शर्वाणीं स्वानुरूपां तमनिशममृतेशाख्यमीशं स्मरामि ॥
श्रीमन्महेशनलिनासननिर्जरेन्द्रस्तत्राश्विनावथ ततोऽत्रितनूद्भवश्च ।
धन्वन्तरिश्चरकसुश्रुतसूरिमुख्याः तेऽस्मायुरागमकृतः कृतिनो जयन्तु ॥

[भक्त्या ।

शम्भुं प्रणम्य शिरसा स्वगुरूनुपास्य पित्रोः पदाब्जयुगले प्रणिपत्य
विघ्नेशितारमधिगम्य सरस्वतीं च प्रारम्भि भेषजनिकायनिघण्टुराजः ॥
धन्वन्तरीयमदनादिहलायुधादिविश्वप्रकाश्यमरकोशसशेषराजौ ।
आलोक्य लोकान्विदितांश्च शब्दान् द्रव्याभिधासङ्ग्रह एव सृष्टः ॥
आयुःकृतीनामतुलोपकारं धन्वन्तरिग्रन्थमतानुसारम् ।
आचक्ष्महे लक्षणलक्ष्यसारं नाम्ना स्वयं सर्वरुजापसारम् ॥
निर्देशलक्षणपरीक्षणनिर्णयेन नानाविधौषधविचारपरायणो यः ।
सोदि(ऽधी)त्य यत्सकलमेनमुपैति सर्वं तस्मादयं जयति सर्वनिघण्टुराजः ॥
नानाविधौषधिजवीर्यविपाकभावप्रस्तावनिस्तरणपण्डितचेतनोऽपि ।
मुह्यन्त्यवश्यमनपेक्ष्य निघण्टुमेनं तस्मादयं विरचितो भिषजां हिताय ॥

निघण्टुना विना वैद्यो विद्वान् व्याकरणं विना ।
अनभ्यासेन धानुष्कस्त्रयो हास्यस्य भाजनम् ॥
नानादेशविशेषभाषितवशाद्यत्संस्कृतप्राकृता-
पभ्रंशादिकनाम्नि शब्दगणनाद्द्रव्याश्च यस्याहृतौ ।
तस्मादत्र तु यावदप्युपकृतिस्तावन्मया गृह्यते
पाथोधिः परिगृह्यते किमखिलं तद्वारि वारांनिधिः ॥
आभीरगोपालपुलिन्दतापसाः पान्थास्तदन्येऽपि च पत्रचारकाः ।
परीक्षितव्या विविधौषधाभिधा रसादिलक्ष्याणि ततः प्रयोजयेत् ॥

* * * *

वर्गानुक्रमणिका—

आनूपादी सदास्मादवनिरुहगडूचीशताह्वादिकौ द्वौ
तत्रान्ते ह्राटकादिस्तदुपरि पठितः पिप्पलीमूलकादिः ।
शाल्मल्यादिप्रभद्रादिकमनु करवीरादि चाम्रादिकं स्यात्
तस्याग्रे चन्दनादिस्तदनु निगदितः कोमलः काञ्चनादिः ॥

पानीयक्षीरधान्यादिकमनुकथिता मांसमानुष्यकादि
सिंहादिस्स्यात् गजादिस्तदनुभवति सत्त्वादिको मिश्रकादि ।
एकार्थादिस्तदेतैः सततपरिचितैः प्रातिभोऽन्नेन सर्गं
वर्गैस्त्वा साधवैद्यो निजमतिहृदयं निस्तरां निश्चिनोति ॥
काश्मीरेण कपर्दिपादकमलद्वन्द्वार्जुनोपार्जित-
श्रीसौभाग्यवशं प्रतापपदवी दाम्ना प्रतिष्ठापिता ।
सोऽयं श्रीनरसिंहनामविदुषा सद्वैद्यविद्याक्षिति-
प्रीत्या प्राप्य सुवर्णरानरचना चित्रोज्ज्वला पीठिका ॥
अन्यत्र विद्यमानत्वादुद(प)योगानपेक्षणात् ।
वृद्धा विस्तरनित्यार्चनोक्तो गुणगणो मया ॥

इति ग्रन्थप्रस्तावना ।

* * * *

**Colophon:**

इति श्रीवैद्यपतिमूर्धन्यरत्नाभरणश्रीमदि(दी)श्वरसूरिसूनुश्रीकण्ठचरणारविन्द-सेवासेवकराजहंसश्रीकाश्मीराद्यवंशाचार्यपरम्परान्वयश्रीनरसिंहपण्डितविरचिते निघण्टुराजापरनामधेयपर्यायवति अभिधानचूडामणौ अनूपादिवर्गः प्रथमः ॥

**End:**

इत्थं प्रसिद्धघनधान्यगुणस्य वीर्यभेदाभिवर्णन(वि)शृङ्खलवाग्विलासम् ।
आम्नायवर्ग इति कथितम् ।

एता चारणमाषमुद्गमधुरश्रीशारिणस्सन्महा-
नानार्हाबहुधान्यसम्पदुचितानन्तायते सन्ततम् ।
तेन श्रीगुहरेचि यद्विरचिते नामोक्तिश्चूडामणौ
वर्गोऽयं स्थिति मतिनूतरचनाधान्याह्वयः षोडशः ॥

**Colophon:**

इति श्रीवैद्यराजराजराजहंसश्रीमदीश्वरसूरिसूनुश्रीमदमृतकरगदाशूला-लङ्कारचरणकोमलकनदनिष्यन्दनप्रसादमकरन्दस्वादनीयसुन्दरीन्दिरावेदचित्तस्-त्कारश्रीकाश्मीराद्यवंशाचार्यपरम्परान्वयश्रीनृसिंहपण्डितविरचिते निखण्डुराजा-परनामवति भोज्यवर्गापरनामधान्यवर्गः षोडशः ॥

मांसम्—

मांसं तु पिशितं क्रव्यं पललं रसमग्रजम् ।
पलं जाङ्गलकं कीशमामिषं च तदुच्यते ॥

* * * *

शल्यमांसं गुरु स्निग्धं दीपनं श्वासकासजित् ।
अस्य द्विप्रसवा वै स्युः कोङ्कणे तुन्दकापयः ॥
गर्हितं तस्य मांसं तु मेध्यं गौरवदुर्ज्वरम् ।

इति मृगाः ॥

अथ पक्षिणः ॥

अरण्यकुक्कुटद्रव्यं हृद्यं श्लेष्महरं परम् ।

---

No. **13255.** अभिधानचूडामणिः.

ABHIDHĀNACŪḌĀMAṆIḤ.

Pages, 45. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 13137.

Contains the Vargas one to three

Same work as the above.

---

No. **13256.** अष्टाङ्गनिघण्टुः, आन्ध्रटीकासहितः.

AṢṬĀṄGANIGHAṆṬUḤ WITH TELUGU MEANING.

Pages, 46. Lines, 6 on a page.

Begins on fol. 1a of the MS. described under No. 1724.

Complete.

This work purports to give the synonymous names of the medical substances mentioned in the Aṣṭāṅgasaṅgraha of Vāgbhaṭa.

**Beginning:**

सर्वज्ञाय नमस्कृत्वा द्रव्याणां गुडभाजितम् ।
अष्टाङ्गसङ्ग्रहोक्तानां निघण्टुरभिधीयते ॥

* * * *

विदारी गजवारिष्टा वृषगन्धेक्षुगन्धकः ।
वल्ली पलशगक्षीरा विदारी श्रेष्ठगन्धकम् ॥

* * * *

पञ्चाङ्गुलावर्धमानाश्चिद्रो गन्धर्वहस्तकाः ।
उरुभूकास्तवैरण्ड आमण्डो वातनाशनः ॥
रक्तैरण्डो द्वि ीयस्तु व्याघ्रो व्याघ्रतलोपमः ।
नकायुदंष्ट्रकाकोलित्रृश्चिकाव्योष्ट्रघूमकः ॥

**End:**

प्रसूनं कुसुमं नामा पुष्पं च कुसुमं स्मृतम् ।
बंक्षरालो पुष्पसंयुक्तं पक्वं फलमुदाहृतम् ॥

शुष्केन रसकं चैव दलोदं दलजं रसम् ।
औषधं भेषजं पथ्यमगदञ्च भिषज्यितम् ॥
क्रियामचिकित्सितं शस्तं प्रायश्चित्तं समाहितम् ।
रोगहारोऽगदङ्कारो भिषग्वैद्यश्चिकित्सकः ॥
शीतांशुमृदुलक्ष्मीभिर्योषासाधनसद्भवम् ।
क्षीरोधाचयोनिजवः पायाद्धन्वन्तरिस्तथा ॥
नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ।
रक्षतां देवभिषजौ वैद्यपुत्रस्य राजसा ॥

**Colophon:**

इति अष्टाङ्गनिघण्टुः समाप्तः ॥

---

No. **13257.** अभिधानरत्नमाला.

ABHIDHĀNARATNAMĀLĀ.

**Pages**, 77. **Lines**, 6 on a page.

Begins on fol. 24*a* of the MS. described under No. 1724.

Complete.

Same work as that described under R. No. 321(*a*) of the Triennial Catalogue of MSS., Vol. I, Part I-A.

Name of the scribe: Mājēṭi Sarvēśaliṅga.

---

No. **13258.** अभिधानरत्नमाला, कर्णाटकटीकासहिता.

ABHIDHĀNARATNAMĀLĀ WITH KANARESE MEANING.

**Substance**, palm-leaf. **Size**, 15⅝ × 1⅜ inches. **Pages**, 90. **Lines**, 7 on a page. **Character**, Kanarese. **Condition**, fair. **Appearance**, old.

Complete.

Same work as the above.

The scribe adds—

अब्देऽसौ विकृतौ च वृश्चिकगते सूर्ये सिते पक्षके
श्रोणाद्योडुनि जीववारसहिते लग्ने धनुष्यालिखत् ।
श्रीमद्वेङ्कटनायकस्य कृपया श्रीश्रीनिवासार्यकः
ग्रन्थं सद्गुणपाठषड्रसनिघण्ट्वाख्यं विपश्चिन्मतम् ॥

विश्वामित्रान्ववाये भवदवतरणो विश्वविद्याविहारी
तार्तीयस्वाम्यशाली गुणगणजलधिः सन्निधौ रङ्गधाम्नः ।
श्रीरङ्गाचार्यसूनुः सह गुणकथनैः षड्साख्यं निघण्टुं
व्यालेखीद्द्वैधविद्याविशदतरमतिः श्रीनिवासार्यवर्यः ॥

---

## No. 13259. अभिधानरत्नमाला, आन्ध्रटीकासहिता.

## ABHIDHĀNARATNAMĀLĀ WITH TELUGU MEANING.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 16. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 96*a*. The other works herein are Auṣadhayōgamu 1*a*, Vaidyaviṣaya (Telugu) 18*a*, Auṣadhayōga with Telugu meaning 27*a*, Vaidyacintāmaṇi 37*a*, Auṣadhayōga (with Telugu meaning) 105*a* and 155*a*, Sahadēvapaśuśāstramu 146*a*, Prativiṣanighaṇṭu (Telugu) 162*a*.

Breaks off in the fifth Skandha.

Same work as the above, and with meaning in Telugu.

---

## No. 13260. अभिधानरत्नमाला, आन्ध्रटीकासहिता.

## ABHIDHĀNARATNAMĀLĀ WITH TELUGU MEANING.

Substance, paper. Size, $8\frac{3}{4} \times 5\frac{3}{4}$ inches. Pages, 33. Lines, 23 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Breaks off in the fifth Skandha.

Same work as the above.

---

## No. 13261. अभिधानरत्नमाला, आन्ध्रटीकासहिता.

## ABHIDHĀNARATNAMĀLĀ WITH TELUGU MEANING.

Substance, paper. Size, $11 \times 8\frac{3}{4}$ inches. Pages, 21. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 74*a*. The other works herein are Kālahastiśatakamu 1*a*, Kāñcipuṣpamañjarī 26*a*, Aruṇācalamañjarī 42*a*, Vētālapañcaviṁśati 57*a*.

Incomplete.

Same work as the above.

## No. 13262. अभिधानरत्नमाला.
## ABHIDHĀNARATNAMĀLĀ.

Pages, 138. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 13222.

Complete in six Skandhas.

Same work as the above.

Date of copying: Friday, the 30th day of the bright fortnight of the Māgha month in the year Khara.

---

## No. 13263. गुणपाठः.
## GUṆAPĀṬHAḤ.

Substance, paper. Size, 13¾ × 8½ inches. Pages, 28. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Vaidyacintāmaṇi (with Tamil meaning) 14*b*, Jātakayōgārṇava 141*a*, Jātakakalānidhi 159*a*.

Complete.

A treatise in materia medica: by Aruṇagiri, son of Rāmacandra of Bhārgavagōtra. The author is stated to have been well-versed in Vēdānta. He salutes Aruṇādrīśa and is probably a native of Tiruvaṇṇāmalai in the South Arcot district or of some place near it.

**Beginning:**

श्रीमन्मानसपङ्कजान्तरलसन्माणिक्यपीठान्तरे
नत्वा पीनकुचासमेतमरुणाद्रीशं मनोऽभीष्टदम् ।
वेदान्ताब्धिनिशाकरोऽरुणगिरिः श्रीरामचन्द्रात्मजः
सत्सारं दिनकृत्यवैभवगुणं वक्ष्याम्यहं प्रस्फुटम् ॥
विश्वोत्पत्तिरुदाहृता प्रथमतः साक्षात्परब्रह्मणः
चिच्छक्तिस्त्रिगुणात्मिका प्रभविता ताभ्याममूत्पुष्कलम् ।
आकाशादनिलस्ततोऽग्निरनलादापश्च ताभ्यां मही
मह्या ओषधयस्ततोऽन्नमभवल्लोकस्तयीतास्त(थासीत्त)तः ॥
तत्पञ्चीकृतपञ्चभूतजनितैस्तैस्तैः शरीरं भवेत्
आधिव्याधिजराविपद्भयरतीनिद्राशनैः संयुतम् ।
प्राक्कर्मानुभवैककारणवपुः प्राप्तं भवेज्ज्यानवै-
हीनाद्यण्डजपिण्डजो भजवरस्वेदोद्भवः प्राणिनाम्(?) ॥

नरदेहप्रमाणम्—

चातुश्चर्ममलादिचायुदशभिः सप्तैः शतैः स्नायुभिः
सूक्ष्मं सायुतलक्षलक्षगुणितं स्थौल्यं चतुर्विंशतिः ।
कोट्यर्धत्रयरोमकूपनिचयं मांसं शतं शल्यकं
सन्धिश्चाष्टसहस्रकं प्रतुचतुर्मर्माणि सं शोडश(!) ॥

* * * *

श्लेष्मप्रकृति—

दूर्वारोचनपद्मकाञ्चननिभः कृष्णालकश्चाल्पभुक्
पुष्टिस्सिंहरवः करीन्द्रगमनः काठिन्यकायो नरः ।
सौम्यः सत्त्वगुणान्वितोऽतिविमलो धीरः सुखी साहसी
द्वात्रिंशद्वपुलक्षणैरभिमतः श्लेष्मप्रकृत्यान्वितः ॥

**End:**

श्रीमद्भार्गवगोत्रसम्भवमहावेदान्तवार्धीन्दुना
सद्वाक्यैररुणाचलाह्वयभिषक्श्रेष्ठंव(ष्ठेन)चोक्तं मया ।
इत्थं सर्वभिषक्प्रमोदजनकं तच्छास्त्रसारानुगं
कृत्याकृत्यसमस्तवस्तुसुगुणं सर्वोपकारात्मकम् ॥

**Colophon:**

गुणपाठस्समाप्तः ॥

---

## No. 13264. गुणपाठः.

## GUṆAPĀṬHAḤ.

Substance, paper. Size, 9 × 6⅝ inches. Pages, 3. Lines, 30 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 22*a*. The other work herein is **Cārucaryā 1*a*.**

Wants the beginning and the end.

Gives chiefly the medical properties of substances. **A stanza in the beginning contains salutation to Jina and proposes to describe the qualities of the shades of various trees.**

Date of transcription: Thursday, the 5th day of the dark fortnight of the Caitra month in the year Virōdhi.

**Beginning:**

जम्बीरं फलमग्निदीपनकरं श्लेष्मानिलघ्नं लघु
श्वासारोचकनाशनं क्रिमिहरं रूक्षं सुगन्धि प्रियम् ।

वृष्यं छर्दिकरं तथासुजननं शुक्रस्य शूलापहं
तृष्णाघ्नं मुखशुद्धिकृद्वितनुते पैत्त्यस्य वृ(व्य)द्धिं परम् ॥

* * * *

भोजनादौ घृतापोशं मल्ल(चुल)कप्रमितं घनम् ।
आयुरारोग्यवृद्धिं च करोति परिशीतलम् ॥
श्रीमाद्यं जिनमानम्य कायजेषु निवारणम् ।
आयुर्वेदार्थमुत्पन्नच्छायावर्गो निगद्यते ॥
रम्भामनोहरच्छाया तृष्णापैत्त्यविनाशिनी ।
शीतला लघुदोषघ्नी नेत्रयोश्चन्द्रशीतला ॥

**End:**

वारोष्णममृतं गव्यं धा(रा)शीतं त्रिदोषलम् ।
पाणिशर्करया युक्तं पातव्यं प्रस्थमात्रकम् ॥
निरुक्तवर्ग फलनारिकेलजले विनिक्षिप्य मुहूर्तमात्रम् ।
पचेत् गृहीत्वा हिमवालुकेन निक्षिप्य यामद्वयमात्रमेव ॥

---

## No. 13265. गुणपाठः.
## GUṆAPĀṬHAḤ.

Substance, paper. Size, 11 × 8¾ inches. Pages, 4. Lines, 17 on a page. Character, Dēvanāgarī and Grantha. Condition, good. Appearance, new.

Begins on fol. 30*a*. The other works herein are **Cārucaryā** 1*a*, Vakuḷāraṇyamāhātmya 33*a*.

Incomplete.

Same work as the above.

---

## No. 13266. गुणपाठः.
## GUṆAPĀṬHAḤ.

Pages, 19. Lines, 6 on a page.

Begins on fol. 126*a* of the MS. described under **No. 1724.**

Wants the beginning and the end.

Deals with the following topics :—

| | |
|---|---|
| १. क्षीरवर्ग. | ३. तक्रवर्ग. |
| २. दधिवर्ग. | ४. वृक्षवर्ग with meaning. |

**Beginning :**

साधारणक्षीरगुणः—

स्वादुपाकरसास्निग्धमोजस्यं धातुवर्धनम् ।
वातपित्तहरं वृष्यं श्लेष्मलं गुरु शीतलम् ॥
प्रायः पयो विशेषेण शुक्रधातुविवर्धनम् ।
* * * *

ग्रन्थान्तरे—

गवां सितानां वातघ्नं कृष्णानां पित्तनाशनम् ।
कफघ्नं रक्तवर्णानां कपिलानां त्रिदोषजित् ॥

**End :**

सुरकाष्ठं भद्रदारु देवपर्यायवाचकः ।

सुराणां काष्ठं सुरकाष्ठं, भद्रं च तत् दारु च भद्रदारु, देवानां दारु देवदारु । एते देवदारुवृक्षनामानि.

---

No. 13267. **चारुचर्या.**

CĀRUCARYĀ.

Pages, 59. Lines, 17 on a page.

Begins on fol. 1*a* of the MS. described under No. 13265.

Complete.

Same work as that described under No. 51, on pages 102, 103, 260 and 261 of M. Seshagiri Sastri's Report No. 2. By Bhōjadēva.

For the end see under the next number.

The scribe adds—

भवाब्दचैत्रमलिननवम्यां रविवासरे ।
वातदेशिकदासेन लिखितं चारुचर्यकम् ॥

---

No. 13268. **चारुचर्या.**

CĀRUCARYĀ.

Pages, 42. Lines, 30 on a page.

Begins on fol. 1*a* of the MS. described under No. 13264.

Complete.

Same work as the above.

**End :**

स्नानानुलेपनहिमानिलखण्डखाद्यैः शीताम्बुदुग्धदधियूषरसैः प्रसन्नः ।
सेवेत चानुशमनं विरतौ रतस्य तस्यैवमाशु वपुषः पुनरेति धाम ॥

हिताय राजपुत्राणां स्वजनानां तथैव च ।
चारुचर्यमिदं श्रेष्ठं रचित भोजभूभुजा ॥

**Colophon:**

इति श्रीमहाराजाधिराजदेवभोजविरचितं चारुचर्य(र्या) समाप्तः(प्ता) ॥

---

## No. 13269. चारुचर्या.
## CĀRUCARYĀ.

Substance, paper. Size, 8 × 6¼ inches. Pages, 11. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 92b. The other work herein is Dravyaguṇapāṭha 1a. Complete.

Similar to the above. This work is also attributed to Bhōjadēva.

**Beginning:**

सुनीतिशास्त्रसद्वैद्यधर्मशास्त्रानुसारतः ।
विरच्यते चारुचर्या भोजभूपेन धीमता ॥

अथ शौचविधिः, दन्तधावनं च—

ब्राह्मे मुहूर्ते उत्तिष्ठेत् ( . . . ) कृतशौचविधिस्ततः ॥

प्रातरुत्थाय विधिना ( . . . ) अत ऊर्ध्वं क्रमेण तु ॥

आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ।
ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥

**End:**

शुश्रूषणं गुरुस्त्रीणां तपस्तीर्थेषु मज्जनम् ।
विद्यायाः सेवनं चैव सततं साधुसङ्गमः ॥
दीनान्धकृपणानां च भ्रातणां चैव पोषणम् ।
कारयेत् सततं भक्त्या कीर्तिलक्ष्मीविवृद्धये ॥
हिताय राजपुत्राणां ( . . . ) रचिता भोजभूभृता ॥

**Colophon:**

इति भोजराजचारुचर्या समाप्ता ॥

---

## No. 13270. दक्षिणामूर्तिनिघण्टुः.
## DAKṢIṆĀMŪRTINIGHAṆṬUḤ.

Pages, 21. Lines, 5 on a page.

Begins on fol. 56a of the MS. described under No. 1724.

Contains the first two Skandhas.

A dictionary of materia medica, attributed to Dakṣaṇāmūrti.

**Beginning:**

गोकण्टकोऽप्यदङ्ग(ष्ट्रगन्ध)श्च स्थलशृङ्गाटकक्षुरः ।
वनशृङ्गाटकश्चैव फलश्च स्वादुकण्टकः ॥
त्रिकण्टको गोक्षुरको गोक्षुरः कटगोक्षुरः ।
भक्ष्यशाका भक्ष्यरश्च भक्षरच्छत्रकण्टकः ॥

* * * *

**Colophon:**

इति दक्षिणामूर्तिनिघण्टुप्रथमस्कन्धः ॥

**End:**

सहस्रवेधिपिण्याको रामठं भस्म सिंहकम् ।
अगूढगन्धमत्युग्रं जरणं भूपसूपकम् ॥
सुगन्धिकं च बाह्लीकं रक्षघ्नो भूतनाशनम् ।
जन्तुघ्नं केसरो हिङ्गु जन्तुगं परिकीर्तितम् ॥

कर्कटशृङ्गी—

शृङ्गी कर्कटकीशृङ्गी वराङ्गी कासनाशनी ।
कुलीरशृङ्गी कर्काटी शृङ्गीति परिकीर्तितः ॥
गजाह्वः कृत्रिमा कोला वल्ली च करिपिप्पली ।
श्रेयसी कपिवल्ली च वसुरश्चविकाफलम् ॥

**Colophon:**

श्रीदक्षिणामूर्तिनिघण्टौ द्वितीयस्कन्धः ॥

---

## No. 13271. देहलक्षणम्.
## DEHALAKṢAṆAM.

Pages, 9. Lines, 7 on a page.

Begins on fol. 21*a* of the MS. described under No. 7991, wherein this work has been omitted to be mentioned in the list of other works given therein.

Incomplete.

On the properties of the various parts and organs which go to make up the human body and which are considered to be the modifications of the five elements (Pañcabhūtas).

**Beginning:**

शिरो मांसास्थिरोमाणि त्वक् च पश्च महीगुणाः ।
मज्जशुक्लोऽप्यसृङ्मेदो मूत्राण्येता अपां गुणाः ॥

निद्रादाहक्षुधालस्यमैथुनान्यनले गुणाः ।
वायोस्यचलदानस्थिनिधावनचकुमारिणाम् ॥
वेगं वैरं पथं लोहं जीवनं वीर्यतो गुणाः ।
तत्त्वानि षण्णवत्यत्वात् तानि स्पष्टं विचक्षते ॥
पञ्च ज्ञानेन्द्रियाण्याहुः तथा कर्मेन्द्रियाणि च ।
चतुष्कमन्तःकरणं प्रकृतिः सप्तधा भवेत् ।
पञ्चकोशः सप्तधातुः वायवश्च चतुर्दश ॥

* * * *

समं कुर्याच्च सर्वत्र समानस्तत्र चोदितः ।
स्तम्भनच्छर्दिजृम्भादि नागवायोः क्रिया मता ॥
हासं मुखविकारश्च रोमाञ्चाक्षिनिमीलनम् ।
कूर्मः प्रकुरुते नित्यं ककरेन्द्रद्विरोचकः ॥
रोदनक्षुतकर्ता च देवदत्तास्तुदा(धा)वकः ।
विहङ्गे वायसानां च ग्रहे वा पक्षिसंकुले ॥
मात्राद्यशुचिभावेऽपि तथा पथ्यादिसेवने ।
यस्मिन् काले तु निष्क्रान्ता यात्रा सा वेश्मनेऽबला ॥
पक्षिग्रहेण यो ग्रस्तस्तेन बालं प्रबाधते ।

**End:**

पलाशपुष्पैर्वि(ः पि)ष्टैर्वा पुष्पैः सहचरस्य वा ।
मृत्पिण्डेनाग्निवर्णेन क्षीरसिक्तेन सोष्मणा ॥
स्वेदयेदुच्छ्रितं नाभिंतुदस्तेन प्रशाम्यति ।
क्षीरादेकपालंक्षरात्रादस्ततोपरोश्चलः ॥ (?)
अन्नादश्चाप्यपरस्मात् गृहं पुज्यताद्विधाप्रायः (?) ।

**Colophon:**

इति समाप्तः ॥

---

No. 13272. द्रव्यगुणपाठः.

DRAVYAGUṆAPĀṬHAḤ.

Pages, 130. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 13229. Incomplete.

Gives the properties of various substances, such as water, milk, curds, buttermilk, butter, etc.

**Beginning :**

श्रियं त्रिलोकीतिलकायमानामात्यन्तिकीं ज्ञातसमस्ततत्त्वाम् ।
सुवागतिं (?) सम्मतिमुज्वलोक्तिं वन्दे सुरेन्द्रं हतमोहतन्त्र(न्द्र)म् ॥
नत्वा पञ्च गुरून् भक्त्या वैद्यपुत्रहिताय च ।
सर्वशास्त्रानुसारेण लिख्यन्ते द्रव्यनिश्चयाः ॥
प्रणिपत्य गणाधीशं नत्वा देवीं सरस्वतीम् ।
तन्त्रेभ्यः सारमुद्धृत्य वक्ष्ये द्रव्यगुणावलिम् ॥
एकविंशतिभिर्वर्गैर्वक्ष्यमाणैः क्रमादिभिः ।
प्राणिनां मूलमाहारसरसाः षडभिष्ठितः ॥
ते द्रव्यं तद्द्विधा भेदाः द्रव्याद्रव्यमिति स्मृतम् ।
चराचरस्य लोकस्य द्रव्यमेव हि कारणम् ॥
प्रधानमम्बु तत्रापि विश्वं जलमयं तथा ।
तस्मात्तोयस्य वर्गं प्राक् प्रोच्यते तदनन्तरम् ॥
क्षीरस्य दध्नस्तक्रस्य नवनीतस्य सर्पिषः ।
मूत्रस्य तैलस्य क्षोस्य (?) पृथक् स्यान्मधुमद्ययोः ॥
शूकशिम्बिजधान्यानां पकान्नस्यामिषस्य च ।
मत्स्यशाकप्रसूनानां मांसपक्कफलस्य च ॥
विविधस्यौषधस्यात्र जलभेदं निरूप्यते ।
अथातः संप्रवक्ष्यामि तोयवर्गं सुविस्तरम् ॥
आपः प्राणस्तु सर्वेषां तस्मादादौ विलिख्यते ।

**End :**

प्राहृत्य खर्परे तस्य जलजातं प्रकारयेत् ।
दीपाग्निदिवसं प्रोक्तं साङ्गशीतलमुद्धरेत् ॥
पक्षक्रीथमयोयन्त्वं प्रथपौरवउदधिम् (?) ।
सर्वकर्माणि दोषांश्च निर्वर्त्य जायते दृढम् ॥

---

No. 13273. द्रव्यगुणपाठः, आन्ध्रटीकासहितः.

DRAVYAGUṆAPĀṬHAḤ WITH TELUGU MEANING.

**Pages, 21. Lines, 32 on a page.**

Begins on fol. 100*a* of the MS. described under No. 13190.

Incomplete.

Similar to the above.

**Beginning:**

सुरासुरशिरोरत्नमरीचिखचिताङ्घ्रये ।
विघ्नान्धकारसूर्याय विघ्नेशाय नमो नमः ॥
ब्रह्मणो म(श्व)श्विनीपुत्रादत्र्यादिमुनिपुङ्गवात् ।
नत्वा गुरुपदाम्भोजं लिख्यते पाठ्यसङ्ग्रहः ॥
काले क्वापद्यस्सन्ति तेन जीवन्ति जन्तवः ।

* * * *

जलसमुदायगुणः—

जीवनं तर्पणं हृद्यं ह्लादि बुद्धिप्रबोधनम् ।
तन्वव्यक्तरसं मृष्टं शीतलस्त्वमृतोपमम् ॥
कर्षं गृहीत्वा द्रव्यस्य तोयस्य प्रस्थमापचेत् ।
अर्धावशेषं तद्ग्राह्यं तोयपाकेष्वयं विधिः ॥
मेहप्लीहज्वरे कुष्ठे पानीयं मन्दमाचरेत् ।

**End:**

चन्द्रकान्तजलं ह्लादि ज्वरदाहविनाशनम् ।

---

## No. 13274. द्रव्यगुणपाठः.
## DRAVYAGUṆAPĀṬHAḤ.

Pages, 50. Lines, 5 on a page.

Begins on fol. 111*a* of the MS. described under No. 13106.

Incomplete.

Similar to the above.

Name of the scribe: Mājēṭi Sarvēśalinga. Date of transcription: Saturday, the 10th day of the dark fortnight of the Śrāvaṇa month in the year Naḷa.

**Beginning:**

जलवर्गः—

जीवनं तर्पणं हृद्यं ह्लादि बुद्धिप्रबोधनम् ।
तनु(न्व)व्यक्तरसं हृष्टं शीतलत्वमृतोपमम् ॥

गङ्गोदकम्—

शीतं स्वादु स्वच्छमत्यन्तरुच्यं पथ्यं चाक्यं पाचकं पापहारि ।
तृष्णामोहध्वंसनं दीपनं च प्रज्ञां धत्ते वारि भागीरथीया(यम्) ॥

**End:**

तदेव शूल्लिकाप्रोतमङ्गारेषु विपाचितम् ।
यमधूततरं मांसं तत्पुष्टिबलवर्णकृत् ॥

**Colophon:**

इति मत्स्यवर्गः समाप्तः ॥

---

No. **13275.** द्रव्यगुणपाठः.
DRAVYAGUṆAPĀṬHAḤ.

Pages, 184. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 13269.

Incomplete.

Same work as the above, and with the following additional stanzas in the beginning.

**Beginning:**

लक्ष्मीनारायणौ वन्दे युक्तौ द्रव्यगुणाविव ।
यो सेवन्ते जनाः सम्यगायुरारोग्यवृद्धये ॥
विघ्नान्धकारमार्ताण्डं प्रज्ञोत्पलनिशाकरम् ।
अघौघकक्षज्वलनं वन्दे वैनायकं महः ॥
शरणं करवाणि शर्मदं ते चरणं वाणि चराचरोपजीव्यम् ।

---

No. **13276.** द्रव्यगुणपाठः.
DRAVYAGUṆAPĀṬHAḤ.

Substance, palm-leaf (Śrītāḷa). Size, 19⅞ × 1¼ inches. Pages, 35. Lines, 5 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are **Jainamantrapūjāvidhāna 19*a*, Ārōgyasadana 66*a*, Jainajātakarmādiprayōga (Kanarese) 72*a*.**

Incomplete.

Similar to the above.

**Beginning:**

बीजं श्रुतीनां सुजनं मुनीनां जीवं जना(डा)नां महतोधि(दादि)कानाम् ।
अप्रमेयमत्वं भवपोत . . . . . . . . महः श्यामलमाश्रयामि ॥
तत्रापि पूर्वं ज्ञातव्या द्रव्यनामगुणागुणाः ।
अतस्तयोः . . . . . तैर्ज्ञानं हि क्रियाक्रमाः ॥

हरीतकी शिवा पथ्या चेतकी विजयाभया ।
प्रपथ्या प्रमथामोघा कायस्था व्रणदामृता ॥
जीवनीया हैमवती पूतनामृतनामया ।

**End:**

पौष्कराह्वं पद्मपत्रं पौष्करं पुष्कराग्निकम् ।
काश्मीरपुष्करजपावीरं सौतन्धिपावकम् ॥
पौष्करं कटुकं तिक्तमुष्णं वातकफज्वरान् ।
हन्ति शोफारुचिश्वा.

---

## No. 13277. द्रव्यगुणसङ्ग्रहः.
## DRAVYAGUṆASAṄGRAHAḤ.

Pages, 101. Lines, 5 on a page.

Begins on fol. 50*a* of the MS. described under No. 13106.
Incomplete.
Slightly different from the above.

**Beginning:**

प्रणिपत्य गणाधीशं नत्वा देवीं सरस्वतीम् ।
तन्त्रेभ्यः सारमुद्धृत्य वक्ष्ये द्रव्यगुणादिभिः ॥
एकविंशतिभिर्वर्गैः वक्ष्यमाणैः क्रमादिभिः ।
वक्ष्ये द्रव्यगुणौषधीनां प्राचीनामूलमाहरः ॥

**End:**

रुद्राक्षधारणगुणः—

शिखामेकं मस्तकवलये षट्त्रिंशत्तु कर्णयोरेकैकम् ।
कण्ठहारे द्वात्रिंशत् बाहौ . . . . ॥

---

## No. 13278. द्रव्यनिश्चयसारसङ्ग्रहः, आन्ध्रटीकासहितः.
## DRAVYANIŚCAYASĀRASAṄGRAHAḤ WITH TELUGU MEANING.

Pages, 128. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 13224.
Incomplete.

A treatise on materia medica. It is accompanied by meaning in Telugu.

**Beginning :**

शाकं वा वास्तुमस्तुष्णं क्रमिघ्नं दीपनं लघु ।
दोषघ्नं च बलं . . . . . ॥
शुकाख्यशाकं सुस्वादु सक्षारं श्लेष्मकोपनम् ।
वातपित्तहरं वृष्यं चक्षुष्यं ग्राहि रोचनम् ॥
* * * *

ग्रन्थान्तरे—

अग्निदीप्तिकरं शीतं वातश्लेष्मकरं परम् ।
जीर्णाग्निपित्तमेहं च निहन्ति स्वादु शाकुटम् ॥
* * * *
कटष्णं गुल्मशूलघ्नं पित्तलं दीपनं परम् ।
कासाश्मरीगदहरं कलुकं पुष्पपल्लवम् ॥

**Colophon :**

इति द्रव्यनिश्चयसारसङ्ग्रहे पुष्पवर्गः ॥

**End :**

फाणितं गुर्वभिष्यन्दि चयकृन्मूत्रशोधनम् ।
* * * *
दध्यं गुरु शकृन्मूत्रं स्यादभिष्यन्दि बृंहणम् ॥
* * * *
नातिश्लेष्मकरं वातसृष्टमूत्रशकृन्मलम् ।
* * * *
नातिश्लेष्मकरं धोतकृष्टमूत्रशकृन्मलम् ! ॥

---

No. 13279. द्रव्यनिश्चयसारसङ्ग्रहगुणपाठः.

DRAVYANIŚCAYASĀRASAṄGRAHAGUṆAPĀṬHAḤ.

Pages, 3. Lines, 32 on a page.

Begins on fol. 11*a* of the MS. described under No. 13190.

Wants the beginning.

The portion contained herein explains how substances and other things effect the predominance or otherwise of the different humours in the human body.

**Beginning :**

अथ कटुतिक्तकषायरूक्षाल्पप्रमिताशनैः समीरणाक्षुत्पिपासारतिच्छर्दिनिद्रा-
क्षिसावजृम्भमधुकालश्रमस्वातिसारनिरूढैः शैत्यमागरना(भोगानारत)क्रियाशोक-
चित्ताल्पग्रायुर्भयोच्चभाषणजलक्रीडातिलङ्घनैर्व्यायामयानेत्यष्टाशनसेवनैः स्त्रीणां
प्रसूतिवैषम्ये च ग्रीष्मेऽनहोरात्रभुक्तं ते वायुः प्रकुप्यन्ति ! ।

* * * *

मधुरास्यताशोफारुचिकण्डूनि श्लेष्मचिह्नानि कथितानि । अथ कटुतिक्तक-षायकटुष्णरूक्षाहारस्वेदनिष्ठीवनवमनपाचनमामनस्यगण्डूषैः हरिद्रमञ्जिष्ठपीताम्ब-रादिकोलाहलधूपितवाशितवस्त्रवर्गैः ।

**End:**

मकरकेतनराज्यलक्ष्मीविलासमानानां मदनकेलीकलापकौतूहलविलासिनामत्य-न्तप्रगल्भानां शङ्खिनीनां सङ्गमैः सत्कथादान . . राष्ट्रविचारैः श्लेष्म क्षयमापद्यते ॥

**Colophon:**

इति द्रव्यनिश्चयसारसंग्रहगुणपाठस्सम्पूर्णः ॥

* * * *

वमनं वमनार्हस्य शस्तं कुर्यात्तदन्यथा ।
श्वासातिसारसंमोहहृद्रोगविषमज्वरान् ॥

---

No. 13280. द्रव्यरत्नावलिः.

DRAVYARATNĀVALIḤ.

Substance, palm-leaf. Size, 15⅝ × 1⅝ inches. Pages, 186. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete.

Similar to the work described under No. 13272, but the substances herein are classified under certain groups.

**Beginning:**

प्राणो भवेत्प्राणभृतां तु नीरं तस्माद्विना नश्यति जीवलोकः ।
तेनैव नित्यं सचराचरं च जगत्सजीवं भवति क्षणेन ॥
तोयक्षीरेक्षुतैलानां वैरे . . . ।
. . . देशोऽयं यथा स्थूलमुदाहृतम् ॥
अविस्तृतमसंक्षिप्तं तोयादिद्रव्यवर्गितम् ।
असंसृष्टमसन्दिग्धं रसवीर्यविपाकतः ॥
जलमेकविधं सर्वं पतत्यैन्द्रं नभस्स्थलात् ।
तत्पतत्पतितं चैव देशकालादपेक्षते ॥
स्वात्पतत्सोमवाय्वर्कैः सृष्टं कालानुवर्तिभिः ।
शीतोष्णस्निग्धरूक्षाद्यैः यथासन्नमहीगुणैः ॥

* * * *

**Colophon:**

इति द्रव्यरत्नावल्यां तोयवर्गः ॥

**Colophon:**

इति द्रव्यरत्नावल्यां समस्तद्रव्यवर्गः ॥

क्षीराश्रितपात्रगुणः—

ताम्रे वातहरं क्षीरं सौवर्णे पित्तनुत्सदा ।
रौप्ये श्लेष्मप्रशमनं कांस्ये रक्तप्रसादनम् ॥

* * * *

गुदपाके मेढ्रपाके मुखपाके हलीमके ।
गर्भिण्यां च विशेषेण वर्जयेदुष्णदो यतः ॥
धातुक्षये रक्तविकारदोषे वान्तिभ्रमस्तोदविषग्रहेषु ।
जीर्णज्वरे शैथिलसन्निपाते जलं प्रशस्तं कृतशीतलं तु ॥
उष्णं शीतं च सलिलं विरुद्धं मिश्रितं च यत् ।
ताटाकं चाम्बु कू(कौ)पं च न द्वयं मिश्रितं पिबेत् ॥

---

No. **13281.** द्रव्यरत्नावलिः.

DRAVYARATNĀVALIḤ.

**Pages,** 136. **Lines,** 26 on a page.

Begins on fol. 1a of the MS. described under No. 13117.

Wants the beginning and the end.

Same work as the above.

---

No. **13282.** द्रव्यवैशेषिकम्.

DRAVYAVAIŚEṢIKAM.

**Pages,** 11. **Lines,** 6 on a page.

Begins on fol. 1a of the MS. described under No. 13182.

Complete.

Gives the special properties of substances according as they undergo certain changes and also the various kinds of measures as well as weights to be used when mixing the substances in proper proportions for medicinal purposes.

**Beginning:**

शुष्कमार्द्रं द्रवं चेति द्रव्यं त्रेधा द्रवं पुनः ।
निरामं साममिति च द्वेधा तैलं घृतं मधु ॥

निराममन्ये तु रसः क्वाथादित्व(पि)मन्यते ।
सामन्तु मूत्रपानीयक्वाथिकादि . . . ॥
उन्मानं च तुलामानमिति मानं द्विधा मतम् ।
उन्मानं कुडुबादि स्यात् तुलामानं पलादिकम् ॥
एवं च नित्यशुष्काणामुक्ता तु तदलाभतः ।
द्विगुणं योजयेद्द्रव्यमार्द्रं सद्यः समुद्धृतम् ॥
नित्यार्द्रं . . . तु शुष्कं च द्विगुणं ततः ।
उक्ता तु नित्यमार्द्रस्य नित्यार्द्रं द्विगुणं न च ॥

**End:**

आढकं चषकं पात्रं भाजनं कदलं मुखम् ।
पात्रं समुद्रक सं च उच्यते दश नामभिः ॥
शिवं तद्द्वितयं ते द्वे . . . . . . . . घटः ।
उन्मानो नल्वणश्चक्रचतुराढकसम्मणः ॥
द्रोणद्वयं तु कलशी तद्द्वयं वहमुच्यते ।
तुलापलशतं तानि विंशतिर्भारमुच्यते ॥

**Colophon:**

इति द्रव्यवैशेषिकं सम्पूर्णम् ॥

---

No. 13283. धन्वन्तरिनिघण्टुः.

DHANVANTARINIGHANTUḤ.

Substance, palm leaf. Size, 16¼ × 1¼ inches. Pages, 96. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1a. The other work herein is Rasanighaṇṭu 49a, Vaidyaviṣaya 53a.

Contains the Vargas one to six.

A work giving the synonymous names of substances as well as their medicinal properties. The work is attributed to Dhanvantari. It has been printed in the Ānandāśrama Sanskrit Series.

**Beginning:**

क्षीरोदमथने जातमभयं दक्षिणे करे ।
सव्ये च सुधया पूर्णं बिभ्राणं कलशं शुभम् ॥
नीलाम्बरधरं देवं दिव्याभरणभूषितम् ।
राजीवाननमासीनं सर्वैर्देवैरुपासितम् ॥
धन्वन्तरीति विख्यातं चिन्तयेत्सुसमाहितः ।

नमामि धन्वन्तरिमादिदेवं सुरासुरैर्वन्दितपादपद्मम् ।
लोके जरारुग्भयमृत्युनाशं दातारमीशं विविधौषधीनाम् ॥
अनेकदेशान्तरभाषितेषु सर्वेष्वथ प्राकृतसंस्कृतेषु ।
गूढेष्वगूढेषु च नामसङ्ख्या द्रव्याभिधानेषु तदोषधेषु ॥
प्रयोजनं यस्य तु यावदेव तावत्स गृह्णाति यथाम्बु कूपात् ।
तथा निघण्ट्वम्बुनिधेरनन्तात् गृह्णाम्यहं किंचिदिहैकदेशम् ॥
नामोक्तमेकस्य यदौषधस्य नामापरस्यापि तथैव चोक्तम् ।
शास्त्रेषु लोकेषु च यत्प्रसिद्धं संगृह्यतेऽसौ पुनरुक्तिदोषः ॥
तुल्याभिधानानि तथा(था)विशिष्टद्रव्याणि योगेषु निवेशितानि ।
अर्थाधिकारागमसम्प्रदायैः विधाय शास्त्रेण च तान् नियुञ्ज्यात् ॥
किरातगोपालकतापसाश्च वनेचरा ये कुशलास्तथान्ये ।
वदन्ति नानाविधभावमेषां प्रमाणवर्णाकृतिनाममी(जा)ति ॥
तेभ्यः सकाशादुपलभ्य वैद्यः पश्चात्स्वशास्त्रेण विमृश्य बुद्ध्या ।
विकल्पयद्द्रव्यरसप्रभावा विपाकवीर्याणि तथा प्रयोगात् ॥
प्रयोजनाः सन्ति वनेचरास्ते गोपादयः प्राकृतनामतज्ज्ञाः ।
प्रयोजनार्था वचने प्रवृत्तिः यस्मादतः प्राव(कृ)तमित्यदोषः ॥

* * * *

तस्मान्निघण्टुरित्येषा नातिसङ्क्षेपविस्तरम् ।
हिताय वैद्यपुत्राणां यथावत्संप्रकाश्यते ॥
द्रव्यावलिविशिष्टानां द्रव्याणां नामनिर्णयम् ।
लोकप्रसिद्धं वक्ष्यामि यथागमपरिक्रमम् ॥
क्वचिदुक्तं विपर्यस्तमिष्टनामेषु तद्यथा ।
मधुपर्णी वेतसारो रोहिणीकटुकादिका ॥
द्रव्यावलिं विना वैद्यास्ते वैद्या हास्यभाजनम् ।
निघण्टुर्वैद्यपुत्राणां तृतीयमिव लोचनम् ॥
पीठिकाधिकारः ॥

* * * *

गुडूच्यतिविषा मूर्वा मञ्जिष्ठा धन्वयासकः ।
वाशा खनिरनिम्बैश्च पिबेत् क्वाथं कफज्वरे ॥

* * * *

**Colophon:**

इति धन्वन्तरीयनिघण्टौ शतपुष्पादिको नाम द्वितीयवर्गः ॥

See under the next number for the end.

---

No. 13284. धन्वन्तरिनिघण्टुः.

DHANVANTARINIGHANṬUḤ.

Substance, palm-leaf. Size, 14½ × 1⅝ inches. Pages, 107. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Contains the Vargas one to nine.

Same work as the above, but herein the last Varga, viz., Miśraka Varga, is split up into three Vargas, viz., Miśraka, Viṣōpaviṣa and Viṣaghna. In the summary given at the beginning only six Vargas are given.

See under the previous number for the beginning.

**End:**

शङ्खमूला कद्रटिका वालिनी शङ्खबीजया ।
शूर्पपर्णी महाकृष्णसहाक्षी सूकरीति च ॥
एते चान्ये च बहवो ये चान्ये प्रथिता भुवि ।
* * * *
विषादिसहवर्गोऽयं नामतः परिकीर्तितम्(:) ।
हिताय सर्वजन्तूनां दिव्यौषधसमन्वितः ॥
गलूच्यादि शताह्वादि तथान्यैश्च(न्यच्च)न्दनादि च ।
करवीरादिराम्रादि सुवर्णादिविमिश्रकः ॥
विषोपविषवर्गास्तु विषघ्नास्तु तथैव च ।
इत्येतत्क्रमशो वर्गनाम चैव प्रकीर्तितः ॥

**Colophon:**

इति धन्वन्तरीयनिघण्टौ नवमो वर्गः ॥

इति धन्वन्तरीयनिघण्टुः समाप्तः ॥

---

No. 13285. धन्वन्तरिनिघण्टुः.

DHANVANTARINIGHANṬUḤ.

Pages, 28. Lines, 6 on a page.

Begins on fol. 96*a* of the MS. described under No. 1724.

Breaks off in the second Varga.

Same work as the above.

No. 13286. धन्वन्तरिनिघण्टुः, आन्ध्रटीकासहितः.
DHANVANTARINIGHAṆṬUḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 34. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in the second Varga.

Same work as the above.

---

No. 13287. धन्वन्तरिनिघण्टुः.
DHANVANTARINIGHAṆṬUḤ.

Substance, palm-leaf. Size, 16½ × 1⅝ inches. Pages, 121. Lines, 6 on a page. Character, Kanarese. Condition, much injured. Appearance, old.

Contains the Vargas one to seven.

Same work as the above.

Date of transcription: Sunday, the 2nd day of the bright fortnight of the Āṣāḍha month in the year Khara, 1690 Śālivāhana Śakha. Name of the copyist: Aḷagasiṅgarayalu.

---

No. 13288. धन्वन्तरिनिघण्टुः, आन्ध्रटीकासहितः.
DHANVANTARINIGHAṆṬUḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 11¼ × 1¼ inches. Pages, 116. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the Vargas one to three, but the second Varga is incomplete and the third Varga wants the beginning.

Same work as the above.

---

No. 13289. धन्वन्तरिनिघण्टुः, आन्ध्रटीकासहितः.
DHANVANTARINIGHAṆṬUḤ WITH TELUGU MEANING.

Pages, 12. Lines, 32 on a page.

Begins on fol. 1*a* of the MS. described under No. 13190.

Contains the Vargas one to six.

Same work as the above.

---

No. 13290. धन्वन्तरिनिघण्टुः.
DHANVANTARINIGHAṆṬUḤ.

Pages, 13. Lines, 5 on a page.

Begins on fol. 44*a* of the MS. described under No. 13063.

Wants the beginning in the first Varga and the end in the second Varga.

Same work as the above.

---

## No. 13291. धन्वन्तरिनिघण्टुः. DHANVANTARINIGHANṬUḤ.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 89. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains the Vargas one to six.

Same work as the above.

This manuscript is said to have been copied by Caganti Gavaraya and given to Mājēti Sarvēśalinga. Date of transcription: Sunday, the 1st day of the dark fortnight of the Caitra month in the year Akṣaya.

The following colophon is found herein:—

इति धन्वन्तरिनिघण्टौ योगगणसमुच्चयः समाप्तः ॥

---

## No. 13292. धन्वन्तरिनिघण्टुः, आन्ध्रटीकासहितः. DHANVANTARINIGHANṬUḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 14¾ × 1½ inches. Pages, 114. Lines, 6 on a page. Character, Grantha. Condition, very much injured. Appearance, old.

Breaks off in the fifth Varga, but wants the introductory stanzas.

Same work as the above.

---

## No. 13293. धन्वन्तरिनिघण्टुः, द्राविडटीकासहितः. DHANVANTARINIGHANṬUḤ WITH TAMIL MEANING.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 66. Lines, 6 on a page. Character, Grantha and Tamil. Condition, injured. Appearance, old.

Contains the Vargas three and four only.

Same work as the above. It is accompanied with meaning in Tamil.

## No. 13294. धन्वन्तरिनिघण्टुः.
## DHANVANTARINIGHAṆṬUḤ.

Pages, 7. Lines, 32 on a page.

Begins on fol. 7a of the MS. described under No. 13190

Complete.

Herein the names of substances are arranged in order according as they are capable of giving one meaning, two-fold meanings, three-fold meanings or more. This work is also attributed to Dhanvantari.

**Beginning:**

निघण्टुरन्तरा वक्ष्ये नानाद्रव्याश्रितानि तु ।
एकार्थद्वित्रयार्थानि नानार्थानि तथैव च ॥
यथाक्रमेण वक्ष्यामि सावधानमनाः शृणु ।
अथैकार्थानि वक्ष्यन्ते शृणु मे कथितं शुभम् ॥
शतपुष्पा शतसुमा दन्तहस्ती च नागराः ।
भाण्डा गौरीति मञ्जिष्ठा सर्वरसः बहुस्रवा ॥

**Colophon:**

इत्येकार्थानि ॥

**End:**

पद्मगन्धोत्पलाकाशे हस्तं हस्ताम्रवादिषु ।
वाद्यभाण्डमुखे चैव प्रोक्तं प्राच्येषु पुष्करम् ॥
यमानिलेन्द्रचन्द्रार्ककपिमण्डूकवारिषु ।
शुककेशवसिंहेषु भुजङ्गेषु हरिः स्मृतः ॥

इति नानार्थानि ।

**Colophon:**

इति धन्वन्तरिनिघण्टौ नानाद्रव्यार्थज्ञानबोधायां नानार्थान्तः सम्पूर्णः ॥

---

## No. 13295. पथ्यापथ्यवर्गः, आन्ध्रटीकासहितः.
## PATHYĀPATHYAVARGAḤ WITH TELUGU MEANING.

Pages, 31. Lines, 6 on a page.

Begins on fol. 110a of the MS. described under No. 1724.

Incomplete.

A treatise on dietetics.

**Beginning:**

नमः श्रीवर्धमानाय एकद्रव्यस्य लक्षणम् ।
पथ्यापथ्यं प्रवक्ष्यामि सर्वशास्त्रानुसारणी(तः) ।
सैन्धवामृतधान्याकजीरकार्द्रकसंयुतम् ।
तण्डुलीयकवार्ताकपटोलालाबुसाधितम् ॥
गोधूमजीर्णशाल्यन्नं गव्यं क्षीरं घृतं दधि ।
हंसोदकं मुद्गरसं रसेन्द्रस्य हितं विदुः ॥

* * * *

कांस्यं च गुरु विष्टम्भि तीक्ष्णोष्णं च भृशं तथा ।
अपथ्यं सूतराजस्य विहितं कथ्यते बुधैः ॥

**End:**

तुषाहीना विषा मुद्गा सतुषा आढकी विषा ।
कुलुत्थं भर्जितविषा चणका सर्वतो विषा ॥
वार्ताकं कोमलं पथ्यं कूष्माण्डं कोमलं विषम् ।
कपित्थं सर्वदा पथ्यं कदली न कदाचन ॥

---

## No. 13296. भोजनकुतूहलम्.
## BHŌJANAKUTŪHALAM.

Substance, paper. Size, 13¾ × 8½ inches. Pages, 260. Lines, 17 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the first Paricchēda only.

A treatise on medicine by Raghunātha, pupil of Anantadēva, describing what kind of substances may be taken as food and what their properties are as well as how they should be used as food and other connected subjects.

At the end there is an index of subject-matter extending over 42 pages.

**Beginning:**

नमः प्रचण्डवेतण्डतुण्डाय मृडसूनवे ।
प्रत्यूहतिमिरध्वंससमुद्यत्करभानवे ॥
तस्मै नमः परानन्दमकरन्दरसाप्तये ।
श्रीगुरोः पादपद्माय यत्र मे निश्चलं मनः ॥

नत्वा तत्त्वविदो मुनिमुख्यान् धन्वन्तरिसुखभोज्यगुणज्ञान् ।
भोजनकौतूहलमथ तत्त्वेनानेन जनो निपुणो मुदमीयात् ॥

अथ भोजनविधिः । तत्र—"जीर्णो हितं मितं चाद्यात्" इत्यायुर्वेदोपदेशात्, "भोक्तव्यं सघृतं सोष्णं हितं पथ्यं मितं तथा" इति व्यासस्मरणाच्च भोज्यद्रव्याणि तद्गुणाश्चाभिधीयन्ते । तत्र धान्यप्रकरणम् । तच्च त्रिविधम्—तदुक्तं निघण्टुराजे—"प(धा)न्यं भोज्यं च भोगार्हमनघं जीवसाधनम्" इति । वृत्त्याद्युपजीवनं भोगः जीवसाधनमोषधीभ्योऽन्नम् अन्नात्पुरुष इति श्रुतेः ।

**End:**

तृष्णाशोषविभेदनं धृतिकरं कान्तिप्रदं श्लेष्मलं
क्षौमं शुक्रमतीव हृद्यममलं पित्तामयध्वंसनम् ।
माञ्जिष्ठं च विदाहिकं च कफकृच्चोष्णं च वातामयं
बार्हरुचिरं सुखञ्च कुरुते श्लेष्मापहं च स्मृतम् ॥

इत्युपभोग्यवस्त्रगुणाः ।

इत्थं विमथ्य गुणपांसुसुधाम्बुराशिं लब्धापरामृतरसं सुरतं च तस्मात् ।
निर्माय भोजनकुतूहलमीश्वराणां तोषाय तेन परितुष्यतु शेषशायी ॥
संसेविता नरवतरस्तरवश्च दृष्टा येने क्षितौ जनपदेषु च तेषु तेषु ।
भैषज्यतन्त्रमपि नैव कृतं स्वतन्त्रं तेषां कृतेऽपि च कृतं रघुनाथनाम्ना ॥
अनन्तदेवान्मनसा विधायाप्यनन्तदेवस्य विधाय सेवाम् ।
योऽनन्तदेवः प्रथितः पृथिव्यामनन्तदेवः परितोषमेतु ॥

**Colophon:**

इति श्रीमद्विद्वद्वृन्दवन्द्यपादारविन्दश्रीमदनन्तदेवदयोदयस्य रघुनाथविदुषः कृतौ भोजनकुतूहले द्रव्यगुणागुणकथनं नाम प्रथमः परिच्छेदः ॥

भोः पटुवादाः(ण्डिताः) कृतधियः शृणुतामलां नो
वाचं विविच्य विभवाय चिरं प्रसूताम् ।
संसेवयन्तु विमलं कमलान्तरङ्ग-
मेनं रसं न रसितुं प्रभवन्तु भेकाः ॥
यदि पूतिगन्धबहुले वारिणि बद्धादरः पोत्री ।
स्पृहयति पा(वा)रि न गाङ्गं गुरु गीर्वाणैरपाकृतं किं स्यात् ॥

No. 13297. भोजनकुतूहलम्.
BHŌJANAKUTŪHALAM.

Substance, paper. Size, 11 × 8¾ inches. Pages, 127. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the third Paricchēda complete.

Same work as the above. This Paricchēda deals as to how people should conduct themselves during night time. It begins with the conduct and duties of woman under various conditions.

**Beginning:**

अथ आदौ स्त्रीधर्माः—तत्र प्रोषितभर्तृकाधर्माः ।
विज्ञानेश्वरीये—

क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम् ।
हास्यं परगृहे यानं त्यजेत् प्रोषितभर्तृका ॥

* * * *

न स्थातव्यं न गन्तव्यं वृक्षमूलेषु सर्वदा ।
न भस्माद्रि सदा तिष्ठेत् लट्टाच्छायां विवर्जयेत् ॥
शोकं रक्तविमोक्षं च साध्वसं कुक्कुटासनम् ।
व्यवायं च दिवास्वापं रात्रौ जागरणं त्यजेत् ॥
अतिक्षारं तु नाश्नीयादत्यम्लमतिभोजनम् ।
अत्यम्लमतितीक्ष्णं च दुष्टाहारं परित्यजेत् ॥
यस्तु तस्या भवेत् पुत्रश्चिरायुर्वृद्धसंमतः ।
अन्यथा गर्भपतनं समाप्नोति न संशयः ॥

**End:**

इति विविधनिबन्धाब्धीनगाधान् विगाह्य
प्रचलगुरुसमीक्षानौकया निर्विशेषम् ।
रुचिरतरललामग्राममासाद्य तत्त-
द्विहितविधिविधेयं संभृतं भूतयेऽस्तु ॥
शाखायाः पारिजातस्य कौस्तुभस्या(पि) दीधितेः ।
हेमाद्रेरिव वा सानोरस्तु ग्रन्थस्य गौरवम् ॥
अनेन ग्रन्थरूपेण कौस्तुभश्रीविभासिनी ।
हरेर्वक्षस्स्थले लक्ष्मीः प्रसन्नास्तु महोमयी ॥

प्रमाणविचिरत्नालिसंभृतः सुमनोयुतः ।
ग्रन्थरूपोऽञ्जलिर्भूयाल्लक्ष्मीपतिपदार्पितः ॥
जननीक्लेशकर्तारः सन्त्वन्येषां सुतोच्चयाः ।
जननीतोषभूयायै भूयादेष मदङ्गजः ॥

**Colophon:**

इति हरपादारविन्दगोविन्दभजनावाप्तविद्याविभवस्य नतदेवदयोदयस्य श्रीरघुनाथसूरिणः कृतौ भोजनकुतूहले विभावरीविलासस्तृतीयः परिच्छेदः ॥

---

### No. 13298. भोजनकुतूहलम्.
### BHŌJANAKUTŪHALAM.

Substance, paper. Size, 8¾ × 6¾ inches. Pages, 92. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the third Paricchēda complete.

Same work as the above.

---

### No. 13299. मदननिघण्टुः.
### MADANANIGHAṆṬUḤ.

Substance, palm-leaf. Size, 14¼ × 1¼ inches. Pages, 51. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Wants the beginning and the end.

Gives the synonymous names of certain substances and then describes their medicinal properties.

**Beginning:**

यवक्षारः स्मृतं पाक्ये यवजो यवसूकजः ।
यवसूको यवाग्रश्च यवापथ्यो यवाग्रजः ॥

गुणः—

यवक्षारोऽग्निकं श्लेष्मश्वासकासगदामयान् ।
आमार्शग्रहिणीगुल्मं यकृत्प्लीहरुजां जयेत् ॥

सद्यः क्षारगुणः—

स्वर्जिकास्वर्जिकापाख्या सुखवर्चा सुवर्चिका ।
स्वर्जिका तद्गुणा प्रोक्ता विशेषाद्गुल्मशूलनुत ॥

**End:**

शाकं बर्बरमीषमुष्टिमनिलाश्लेष्मादहं चाग्निकृत
दम्पुंसाधु क्रिमित्रणां सरकरं दुर्नामगुल्मापहम्(!) ॥

पुष्णन् कुरातातबलानुगुल्मा क्रिमिं जयेदाशु गुदाङ्कुरांश्च ॥
गौळीयाकं तु वातघ्नं कफपित्तकरं परम् ।
शोफदुर्नामहृद्बल्यं मूत्रघातेषु सम्मतम् ॥

---

## No. 13300. रसनिघण्टुः.
## RASANIGHAṆṬUḤ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 49a of the MS. described under No. 13283.

Complete.

A dictionary giving the synonymous names of mercury and other inorganic substances and other connected things.

**Beginning:**

शिवबीजं सूतराजं पारदं च रसेन्द्रकम् ।
रसराजं रसस्सूतं रुद्ररेतो महारसः ॥
हरवीर्यं रसाग्र्यं च रसनादो रसोत्तमः ।

महारसः—

अभ्र(वै)कान्तमाक्षीकविमलाद्रिजसस्यकम् ।
चपलो रसकर्मे(श्रे)ति ज्ञात्वा(ष्टौ) रससङ्ग्रहः ॥

* * * *

अथोपरसाः—

गन्धं गैरिककासीसं काङ्क्षिकाचिसुराष्ट्रजम् ।
तालं नीलाञ्जनं चैव कङ्कुष्ठं चेत्युपरसाः ॥

**End:**

सिकता वालुका शुक्ता शीतला सूक्ष्मशर्करा ।
प्रवाहोत्था महाश्लक्ष्णा सूक्ष्मा पानीयशर्करा ॥

मृत्तिका—

मृन्मृत्तिका च मृत्स्ना च मृत्सा मृत्स्ना च मृत्तिका ।
कृष्णमृत्कृष्णमृत्स्ना च पाण्डुमृत्स्ना च पाण्डुमृत् ॥
वल्मीके रक्तमृत्स्ना च क्रिमिजं वामलूरकम् ॥

**Colophon:**

रसनिघण्टुः समाप्तः ॥

## No. 13301. रसनिघण्टुः.
## RASANIGHANTUḤ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 106b of the MS. described under No. 13082.

Complete.

Same work as the above.

**Colophon:**

इति महारसनिघण्टुः संपूर्णः ॥

---

## No. 13302. वस्तुगुणकल्पवल्ली, आन्ध्रटीकासहिता.
## VASTUGUṆAKALPAVALLĪ WITH TELUGU MEANING.

Pages, 13. Lines, 6 on a page.

Begins on fol. 41a of the MS. described under No. 13122.

Wants the beginning and the end.

On the medical properties of substances used in medical preparations and in dietary.

**Beginning:**

क्षीरं पट्वम्लादियोगाद्विपाके तोयं किट्टं तद्भवेत् द्विःप्रकारम् ।
प्रोक्तं चैवं क्षीरपिण्डाह्वयं तत्सर्वान्दोषान् नीत(नाश)येत्स्वादुभेदिः ॥

* * * *

क्षीरसन्तानिका स्निग्धा मधुरा वह्निनाशिनी ।
चक्षुष्या सर्वदोषघ्नी वृष्या गुरुतरा मता ॥

* * * *

**Colophon:**

इति क्षीरवर्गः ॥

**End:**

वातघ्नं कफकृत् स्निग्धं बृंहणं नातिपित्तकृत् ।
कुर्यादन्नाभिलाषं च दधिमस्तु परीस्रुतम् ॥

---

## No. 13303. वस्तुगुणकल्पवल्ली, आन्ध्रटीकासहिता.
## VASTUGUṆAKALPAVALLĪ WITH TELUGU MEANING.

Pages, 14. Lines, 6 on a page.

Begins on fol. 103a of the MS. described under No. 13115.

Complete.

Same work as the above.

## No. 13304. वस्तुगुणनिर्णयः, आन्ध्रटीकासहितः.
## VASTUGUṆANIRṆAYAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 12¼ × 1½ inches. Pages, 24. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete.

Similar to the above.

**Beginning:**

रुचिकरवलकारी पैत्त्यउन्मदहारी
ज्वरहरक्रमिहारी श्लेष्मशूलानिवारी ।
वम(न)दव(नुद)तिसारी सर्वगुल्मापहारी
जनयति जठराग्निं जीरकं दीप्यकारी ॥
दिव्यदो दीपनी वृष्यदिव्यतेजो विलोन्नतः ।
कुष्ठगुल्मरुतं(जं)हन्तिं कफशोफक्रमिं जयेत् ॥
प्राणवातगतारोगांश्चाष्टशूलनिवारणम् ।

जाजीपत्रगुणम्—

जाजीपत्रं च पुष्पं च वीर्यवृद्धिकरं परम् ॥
मधु मेहं च नाशं च करपादविदाहनुत् ।
त्वक्क्षीरी शुक्रमेहानां सर्वमेहनिवर्हणम् ॥

**End:**

गोलिशाकं तु वातघ्नं कफपित्तकरं स(प)रम् ।
शोफदुर्नामहृत्कृच्छ्रं मूत्रघातेषु सम्मतम् ॥

---

## No. 13305. वैद्यनिघण्टुः, आन्ध्रटीकासहितः.
## VAIDYANIGHAṆṬUḤ WITH TELUGU MEANING.

Pages, 148. Lines, 7 on a page.

Begins on fol. 173a of the MS. described under No. 13126.

Apparently complete.

Contains an alphabetically arranged list of the names of medical substances with Telugu equivalents for the same.

Name of scribe: Mājēṭi Sarvēśalingam. Date of transcription: Thursday, the 13th day of the bright fortnight of the Āśvija month in the year Rudhirōdgāri.

**Beginning:**

अर्कलता—యిరవుడు, సురవుడు.
अर्कपुष्पिका—కోలపాల, పాల.
अर्कपर्णी—జిల్లేడు.
अर्कपुष्पी—అంబాళం.
अलर्क—తెల్పర.
अकुष्ठवाक्—ధూసర.
अङ्कुरम्—చిగురు.
अङ्कोल—ఊడుగ.
अङ्कोलपुष्पी—చాము.
अग्निपर्णिका—ముయ్యాకుపొన్న.
अखिला—నోంఛ.
आखुपर्णी—ఎలుక చెవి.

**End:**

क्षुद्राम्लिका—పులిచించలం.
क्षुद्रा—బ్రాఁకుడు.
क्षुद्राग्निमन्था—తక్కిలి.
क्षुद्रोत्पलम्—కాకికల్వ.
क्षुद्बाधक—ధూమాపటికం.
क्षुरा—కేఁదగ.
क्षुर—పల్లేరు.
क्षेत्रभूति—(కి)రాజ్యరముల్లి.

---

## No. 13306. वैद्यनिघण्टुः.

## VAIDYANIGHAṆṬUḤ.

Substance, (Śrītāla) palm-leaf. Size, 9 × 2 inches. Pages, 120. Lines, 10 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Wants the portion up to टवर्ग in the beginning.

Gives the names of medical substances arranged in alphabetical order with Kanarese meaning for the same.

**Beginning:**

तूणीर, तूष्णीं, तृद्, तृष्णा, त्र्यूषण, त्रिकटुक ।

**End:**

सौराष्ट्रम् । हरियोगी । हयमूला ॥

---

## No. 13307. शतश्लोकी, आन्ध्रटीकासहिता.

## ŚATAŚLŌKĪ WITH TELUGU MEANING.

Substance, paper. Size, 7⅜ × 6 inches. Pages, 80. Lines, 13 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete. Contains the stanzas 1 to 71.

A treatise prescribing certain medical substances for curing various kinds of diseases.

**Beginning:**

मुस्ता पर्पटधन्वयीषयानिकामुनिम्बविश्वामृता
मृद्वीका दशमूलनिम्बसहदेव्यारग्वधव्याघ्रयः ।
सेव्याम्भस्तु निषण्णचन्दनबलापाठावरीशारिवा
खर्जूरत्रिफला मधूकमधुकान्यश्वत्थजं वल्कलम् ॥
रास्नानिर्जरदारुचव्यचपलामूलानिमूर्वोत्पलं
मञ्जिष्ठाकणवेणुपत्रकटुकाभार्ङ्गीपटोला निशा ।
स्तन्यक्षोणिभुजङ्गपुष्पलतिकारुद्राक्षगोरोचना
वाशाकिरजलाजवत्सकसितास्सवान्निहन्ति ज्वरान् ॥

See under the next number for the end.

---

No. 13308. शतश्लोकी, आन्ध्रटीकासहिता.

ŚATAŚLŌKĪ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 14¾ × 1⅞ inches. Pages, 112. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

Copying was made by Subbarāya, son of Gunnayya, and was completed on Friday, the 2nd day of the Bhadrapada month in the Rākṣasa year.

See under the previous number for the beginning.

**End:**

योनिरोगस्य—

रास्नासैन्धवपथ्यकोलमरिचाजाजीहयांवृश्चिका
गीर्वाणद्रुमहिङ्गुदीप्यकयवक्षाराब्दपाठासिता ।
उग्रागोक्षुरमातुलुङ्गकशिफातैलं तथैरण्डजं
तैलं क्षीरघृतानि च प्रशमयन्त्य . . योन्यामयान् ॥

**Colophon:**

शतश्लोकी सम्पूर्णा ॥

---

No. 13309. शतश्लोकी, आन्ध्रटीकासहिता.

ŚATAŚLŌKĪ WITH TELUGU MEANING.

Pages, 48. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 12065.

Contains the stanzas 1 to 72 only.

Same work as the above.

No. 13310. शतश्लोकी, आन्ध्रटीकासहिता.
ŚATAŚLŌKĪ WITH TELUGU MEANING.

Substance, paper. Size, 9¾ × 6¼ inches. Pages, 37. Lines, 34 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 84a.

Contains the stanzas 1 to 99 only.

Same work as the above.

Name of scribe: Majeṭi Sarvēśaliṅgam. Date of copying: Wednesday, the 3rd day of the bright fortnight of the Āśvayuja month in the year Svabhānu.

No. 13311. शतश्लोकी, आन्ध्रटीकासहिता.
ŚATAŚLŌKĪ WITH TELUGU MEANING.

Pages, 57. Lines, 7 on a page.

Begins on fol. 178a of the MS. described under No. 13204.

Contains the stanzas 1 to 99 only.

Same work as the above.

No. 13312. शतश्लोकी.
ŚATAŚLŌKĪ.

Pages, 18. Lines, 5 on a page.

Begins on fol. 29a of the MS. described under No. 13083.

Incomplete.

Same work as the above.

No. 13313. शतश्लोकी.
ŚATAŚLŌKĪ.

Substance, palm-leaf. Size, 13¾ × 1½ inches. Pages, 14. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 225a. The other work herein is Vaidyaviṣaya 1a.

Incomplete.

Same work as the above.

No. 13314. शतौषधानि.
ŚATAUṢADHĀNI.

Pages, 8. Lines, 6 on a page. Character, Nandināgarī.

Begins on fol. 130a of the MS. described under No. 2898.

Purports to give the names of one hundred substances having valuable medical properties. At the end of the work is an index covering four pages of the names of certain medical substances with a few particulars about them.

**Beginning:**

काश्मीर्यमघमूलं च सहदेव्यास्तथा परम् ।
अपराजितथा गुञ्जा उशीरकरवीरकौ ॥
अघपारी शङ्खपुष्पी यष्टिकोष्ठककीचकम् ।
असिता विष्णुक्रान्ता च मयूरस्य शिखा तथा ॥

**End:**

वचा खर्जूरमुस्ता च सर्वौषध्यः प्रकीर्तिताः ।
मूलानि मानिनीक्षिप्तमध्ये तेषां तु हेमजम् ॥
मूलं विधाय यत्नेन दीर्घेण चतुरङ्गुलम् ।

---

No. 13315. सारसङ्ग्रहः, द्राविडटीकासहितः.

SĀRASAṄGRAHAḤ WITH TAMIL MEANING.

Substance, palm-leaf. Size, 17¾ × 1⅜ inches. Pages, 54. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains up to the end of the Mānavarga.

Apparently a compilation about the medical properties of substances and their relative importance. A chapter on measures and weights is found at the end of the work.

**Beginning:**

रागादिरोगान् सततानुषक्तान् अशेषकायप्रसृतानशेषान् ।
औत्सुक्यमोहारतिदान् जघान यः पूर्ववैद्याय नमोऽस्तु तस्मै ॥
वर्गाः पारदलोहरत्नविविधैर्यद्द्रव्यकन्दाश्मस-
त्वक्पत्रैः कुसुमैः फलैश्च लतिकासारैश्च मूलैरपि ।
निर्यासैश्च पयःषड्द्रुमपचैः क्षीरैश्च पथ्यादिभिः
शारीरामयकालमाननिकरैर्युक्ता चतुर्विंशतिः ॥

आदौ रसोत्कर्ष उच्यते—

अल्पमात्रप्रयोगत्वात् उत्प्रसङ्गो भवेन च ।
क्षिप्रमारोग्यदानत्वात ओषधीभ्यो रसोऽधिकः ॥
यन्मूर्छयेत्तस्य निहन्ति मूर्छा बध्नाति यस्तस्य च पाशबन्धनम् ।
यो मारयेत्तं सकरोत्यमारं करतेन सूतेन समः कृपाद्रेः ॥
रकारोऽग्निस्वरूपत्वात् सकारः सोम उच्यते ।
अग्निष्टो(सो)मात्मकत्वाच्च रस इत्युच्यते बुधैः ॥

रसो नाम—

रसेन्द्रः पारदः सूतो रसः पादरसः शिवः ।
अयोनिजो रुद्रतेजोऽस्कन्नस्कन्दाकोमरः(?) ॥

**End:**

माषा द्वादश तोला स्यात् अष्ट तोलाः पलं भवेत् ।
द्वात्रिंशत्पलकं विद्यात् शुभं तु परिकीर्तिताः ॥
शुभस्य तु सहस्रे द्वे भार एवं प्रकीर्तितः ।
तिर्यग्यवोदराण्यष्टौ ऊर्ध्वे वा व्रीहयश्च सः ॥
प्रमाणमङ्गुलस्योक्तं प्रादेशो द्वादशाङ्गुलः ।
प्रादेशद्विगुणोऽरत्निः तस्मात्किष्कुस्ततो धनुः ॥
धनुस्सहस्रं द्वे क्रोशो चतुःक्रोशस्तु योजनः ।
समं तुल्यं समांशं यन्मानमात्रं विधीयते ॥

**Colophon:**

इति मानवर्गः ॥

---

No. **13316.** हरीतकीभेदाः, आन्ध्रटीकासहिताः.

HARĪTAKĪBHEDĀḤ WITH TELUGU MEANING.

Pages, 7. Lines, 6 on a page.

Begins on fol. 63*a* of the MS. described under No. 1724.

Incomplete.

On the characteristic properties of the various kinds of Harītakī (a medicinal plant).

**Beginning:**

विजया रोहिणी चैव पूतना चामृता तथा ।
जीवन्ती त्रिवृता चैव अभया सप्त कीर्तिताः ॥

**End:**

अलर्ककुसुमं पत्रं फलञ्च कटुतिक्तकम् ।
कासश्वासहरं कण्ठ्यं व्रणघ्नं दीपनं लघु ॥
अयोग्यः पुरुषो नास्ति अमन्त्रकमनक्षरम् ।
निरौषधलता नास्ति प्रयोगास्तत्र दुर्लभाः ॥

## (D) VETERINARY, ETC.

### No. 13317. अश्वप्रशंसा.
### AŚVAPRAŚAMSĀ.

Substance, paper. Size, 12¾ × 8¼ inches. Pages, 4. Lines, 17 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 1a. The other works herein are Mānapriyamata 2b, Aśvāyurvēda 17a.

Complete.

A short essay on the importance of horses said to have been taught by Śālihōtra to Suśruta.

**Beginning :**

शालिहोत्रं मुनिश्रेष्ठं सुश्रुतः परिपृच्छति ।
अश्वप्रशंसामाहात्म्यं न ज्ञातं तत्त्वतो मया ॥
तदहं श्रोतुमिच्छामि विस्तरेण वदस्व मे ।
साधु पृष्टं त्वया पुत्र नृपाणां हितकाम्यया ॥
शृणु सुश्रुत सर्वज्ञ तत्प्रभावं प्रचक्ष्महे ।
अश्वैर्हस्तगता पृथ्वी श्रीरश्वैर्विम(लं यशः) ॥
विजयश्च भवेदश्वैः अश्वैर्हर्म्यादिभूषणम् ।
तस्य राज्यं यशो लक्ष्मीधर्मकामार्थसम्पदः ॥
वाजिनो यस्य तिष्ठन्ति सर्वलक्षणसंयुताः ।
अश्वेभ्यः परमं नास्ति राज्ञो विजयकारणम् ॥
तैर्विना न जयस्तस्य वैरिणो वारणैरपि ।

**End :**

मोक्षात्परा गतिर्नास्ति नास्ति वेदात्परा श्रुतिः ।
नास्ति कृष्णात्परो देवो नास्ति यानं हयात्परम् ॥
वाजिनो यत्र तत्राहं यत्राहं तत्र वाजिनः ।
न ते यत्र न तत्राहं नाहं यत्र न तत्र ते ॥

**Colophon :**

इति अश्वप्रशंसाध्यायः ॥

---

### No. 13318. अश्वलक्षणशास्त्रम्, आन्ध्रटीकासहितम्.
### AŚVALAKṢAṆAŚĀSTRAM WITH TELUGU MEANING.

Pages, 150. Lines, 20 on a page.

Begins on fol. 151a of the MS. described under No. 859.

Complete in eight Adhyāyas dealing with the following topics :—

| | |
|---|---|
| १. अश्वपरीक्षा. | ५. हयवयोज्ञानम्. |
| २. वर्णपरीक्षा. | ६. रेखायुर्ज्ञानादिवर्णनम्. |
| ३. पुण्ड्रपुष्पगन्धादिवर्णनम्. | ७. अश्वपोषणविधिः. |
| ४. शुभाशुभावर्तविचारः. | ८. मर्मविभागः. |

A treatise on the different breeds of horses and their characteristics with hints for finding out, the good specimens among them, the duration of their lives, the marks on their bodies, their vital parts, etc., and for feeding them, etc. The work is attributed to Śālihōtra. Reference is also made to a big treatise on this subject by Siṁhadatta. A Telugu rendering is added. The name of the Telugu translator is not given, but he gives introductory and concluding stanzas in Sanskrit.

Date of transcription : Friday, the 7th day of the bright fortnight of the Śrāvaṇa month in the year Svabhānu.

**Beginning :**

श्रीहयग्रीवाय नमश्चन्द्रिकाकान्तकान्तये ।
उपासकजनाज्ञानतमिस्रासप्तसप्तये ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

अभङ्गुरकलादानस्थूललक्षस्त्वमीयुषे ।
तुङ्गाय महसे तस्मै तुरङ्गाय मुखे नमः ॥

आरभ्यास्मद्गुरुभ्यस्तां ध्यात्वाचार्यपरम्पराम् ।
अश्वलक्षणशास्त्रं तद्याकरोम्यान्ध्रभाषया ॥

पुस्तकान्तरदौर्लभ्याद्विशोध्येदं यथामति ।
क्रियतेऽथाश्वशास्त्रस्य टीका प्रतिपदात्मिका ॥

* * * *

शालिहोत्रमहं वन्दे वेदवेदाङ्गपारगम् ।
अश्वशास्त्रार्थतत्त्वज्ञं शिवध्यानपरायणम् ॥

* * * *

अश्वशास्त्रसमुद्रं तं सिंहदत्तेन भाषितम् ।
वक्ष्यामि लक्षणं कृत्स्नमश्वानां च विशेषतः ॥

* * * *

आदौ ब्रह्मण आनन्दाश्रुजातास्तु तुरगा मुखात् ।
तस्माद्ब्रह्मसमुद्भूता इति ख्यातास्तथाभवन् ॥
ब्रह्मणो नाभिजातास्ते वातश्चैवाग्निसम्भवाः ।

* * * *

देवैश्च राक्षसैश्चैव मिलित्वा मथिता ध्व(य)तः ।
जाताः समुद्राच्चत्वाता अश्वा अमृतसम्भवाः ॥

* * * *

**Colophon:**

इति शालिहोत्रीये परीक्षा नाम प्रथमोऽध्यायः ॥

* * * *

वातपित्तश्लेष्महरा सप्तधातुविवर्धनी ।
इन्द्रियाणां बलकरी गुप्तिशाला च वक्ष्यते ॥

* * * *

निशापामार्गसिद्धार्थनिम्बलोध्रवराटिका ।
कुबेराक्षी दारुनिशा कस्तूरी केसरं तथा ॥
मधूकारग्वधं मोहगुग्गल्वगरुलोचनम् ।

* * * *

देवालयस्य मृत्स्ना च दन्तिवल्मीकमृत्तिका ।
एतानि पिष्ट्वा लेपं च शरीरे कारयेदनु ॥

**End:**

वदनं च पुरः पादौ पूर्वकाय इति स्मृतम् ।
तन्मध्यो मध्यकायः स्यात् तत्पश्चिम इति स्मृतः ॥

* * * *

शिरोनेत्रमुखं कण्ठकर्णौ वृषणमेहनौ ।
चरणाश्च दश स्थानं तुरगाणां बलं स्मृतम् ॥

* * * *

यानि स्थानानि वर्तन्ते तुरगाणां विशेषतः ।
सामान्यतः शास्त्रकारैरुक्तानि सुबहूनि च ॥
ज्ञातानि ज्ञायमानानि त्वज्ञातानि स्मृतानि च ।
तानि सर्वाणि विज्ञाय ह्युक्तानि च मयाधुना ॥

* * * *

**Colophon:**

इति शालिहोत्रीये मर्मविभागो नामाष्टमोऽध्यायः ॥
अश्वलक्षणशास्त्रस्था शालिहोत्रर्षिभाषिता ।
विवृतीयं यथामूलमष्टाध्याय्यान्ध्रभाषया ॥

हयग्रीवः प्रसीदन्तां(देतु) व्याख्यामाख्यापयन्मया ।
विचिन्त्यैतां प्रसीदन्तु सन्तः सारस्य चिन्तकाः ॥
अश्वशास्त्रं सम्पूर्णम् ॥

---

No. 13319. अश्वायुर्वेदः.
AŚVĀYURVĒDAḤ.

Pages, 30. Lines, 20 on a page.

Begins on fol. 1a of the MS. described under No. 3886.

To the end of the Vayōjñāna portion in the Lakṣaṇasthāna.

A work on the characteristics of horses and the treatment of their diseases in six Sthānas: by Gaṇa who professes to summarize the treatises of Śālihōtra, Suśruta, Garga, etc., and calls the work Siddhasaṅgraha. The names of the Sthānas are—(१) लक्षणम्, (२) रसव्याकरणम्, (३) कल्पसूत्रम्, (४) निदानम्, (५) चिकित्सा, (६) रहस्यम्. Each Sthāna consists of a number of chapters, the topics dealt with therein being given in the introductory stanzas extracted below.

**Beginning:**

अथ अश्वशास्त्रारम्भः—

अतः परं प्रवक्ष्यामि तन्त्रस्यास्य यथाक्रमम् ।
स्थानानां चैव नामानि सूत्राणां च यथाक्रमम् ॥
प्रथमं लक्षणं स्थानमस्मिंस्तन्त्रे प्रकीर्तितम् ।
ततो रसव्याकरणं कल्पसूत्रं तथैव च ॥
निदानं च चिकित्सा च रहस्यं षष्ठमेव च ।
स्थानानि तु षडेतानि शृण्वध्यायांस्ततः परम् ॥
प्रशंसा वाजिनां पूर्वमावर्ताध्यायमेव च ॥
सर्वाङ्गानां परीक्षां च मिश्रकं वाजिलक्षणम् ॥
तत्र वर्णाश्च पुष्पाणि स्वरा गन्धाश्च वाजिनाम् ।
छाया गतिश्च सत्त्वानि निर्दिष्टानि समन्ततः ॥
महादोषास्तालुरागाः कुलानि च वयस्तथा ।
वर्णो राजोपवाह्यश्च प्रदेशाः पुण्ड्रलक्षणम् ॥
लक्षणस्थानमित्येतत् प्रथमं परिकीर्तितम् ।
ततश्च व्याधिनिर्देशः क्रियासूत्रं तथैव च ॥

शाला षड्ऋतुकं देशाः कल्पस्कलवणस्य च ।
परिचर्या तुरङ्गाणां सस्यानां च विधिस्तथा ॥
विनिश्चयो रसानां च र(स)वीर्यविनिश्चयः ।
द्रव्याणां गुणदोषाश्च खादनानि तथैव च ॥
दशमूलविधिश्चैव रसव्याकरणं स्मृतम् ।
कल्पसूत्रं स्नेहकल्पं तथैव कटुपिण्डिका ॥
प्रतिपानविधिश्चैव भोजनानां विधिस्तथा ।
स्वेदानामक्षिरोगाणां कल्पौ (तु) समुदाहृतम् ॥
क्षीरवस्तिश्च वाहानामुत्तरो विस्तरेऽपि च ।
वस्तिर्निरोहकल्पश्च कल्पसूत्रं प्रकीर्तितम् ॥
वायोर्निदानं प्रथमं पित्तस्य च कफस्य च ।
रक्तस्यैव तु वाहानां निदानं परिकीर्तितम् ॥
वातपित्तकफानां च रक्तस्य च समासतः ।
साधारणी क्रिया प्रोक्तावर्तानां च चिकित्सितम् ॥
विविधं चोर्ध्वावर्तश्च क्रियावर्तातिसारिणः ।
चिकित्सा मूत्ररोगाणां स्तम्भानां च चिकित्सितम् ॥
एकाङ्गरोगस्य तथा मुखरोगचिकित्सितम् ।
कासानां च चिकित्सोक्ता स्नेहस्य लवणस्य च ॥
धान्यस्य च सुरायाश्च क्षीरस्य सलिलस्य च ।
नाड्याश्च व्यापदासक्तकिमिकोष्ठचिकित्सितम् ॥
विदुरग्रहरूपं च हृद्रोगश्च निराणुकः ।
अञ्जलीकारिका चैव कर्णरोगचिकित्सितम् ॥
अश्रुपातचिकित्सा च तथापातवलासकः ।
आमण्डकस्तथोक्तः अण्डस्कन्नचिकित्सितम् ॥
अण्डचालिचिकित्सा च पीताण्डस्य चिकित्सितम् ।
रक्ताण्डस्य कफाण्डस्य पूयाण्डस्य चिकित्सितम् ॥
अर्शस्या . . काराणां वालादकाचिकित्सितम् ।
उदराणां तथाष्ठानां मरकन्दस्य चिकित्सितम् ॥
अनुरकन्दचिकित्सा च रात्रिवातचिकित्सितम् ।
कुष्ठानां चैव दद्रूणां पामायाश्च चिकित्सितम् ॥

दंशपैचिकत्वग्दोषाश्वयथुर्द्रौणिकास्तथा ।
मुखजा द्रौणिका हिक्का श्वासाश्चैव तु वाजिनाम् ॥
अतिसाराः कोष्ठराजिशिरोरोगाश्च लिङ्गगाम् (:) ।
पादरोगाश्च वाहानां मकुश्चक्रमकोटकौ ॥
उल्लूकपादिस्तानरुक् गुदभ्रंशस्तथैव च ।
माराभिषण्णदोषाश्च योक्राभित्ताप एव च ॥
अभितापो रक्तपित्तं विद्युल्लिक्षतस्तथैव च ।
अग्निदग्धचिकित्सा च ज्वराणां च चिकित्सितम् ॥
शिङ्खाणिकचिकित्सा च प्रावारकचिकित्सितम् ।
प्रतितूर्णस्तथाण्डाक्षो बुद्बुदः काच एव च ॥
पटलश्च परिस्रावि स्वच्छन्दश्चैव वाजिनाम् ।
नायं प्रेक्षितयः प्रोक्तो नेत्राभिष्यन्द एव च ॥
मुञ्जश्च मूर्धजालश्च नेत्ररोगाः प्रकीर्तिताः ।
द्विव्रणीया च नाडी च पुण्डरीकग्रहस्तथा ॥
अर्बुदशल्यविज्ञानं नष्टशल्यस्तथैव च ।
भग्नलक्षणमश्वानां भग्नस्य च चिकित्सितम् ॥
विषतन्त्रं च वाहानां तथैव च रसायनम् ।
वाजीकरणसूत्रं च अहा अप्येकविंशतिः ॥
एवं चिकित्सितं प्रोक्तं रहस्यमधुना शृणु ।
प्रत्याख्यानीयनामानि स्पष्टस्यारिष्टमेव च ॥
उपसर्गश्चतिर्यस्तु शाखसङ्कहसंज्ञितम् ।
रहस्यस्थानमित्येतत् षष्ठं सम्परिकीर्तितम् ॥
एवं षडेव स्थानानि सम्प्रवक्ष्याम्यतः परम् ।
लक्षणं प्रकृतीनां तु चातुर्वर्ण्यं तथैव च ॥
आयुर्ज्ञानं प्रोथरेखासम्भवः सारलक्षणम् ।
अनूकलक्षणं चैकशरीरस्य च लक्षणम् ॥
विकृता(विकृतं) मिश्रं . . . शेषलक्षणम् ।
गर्भसम्भवविज्ञानं शरीरनिचयस्तथा ॥
सुतिकोपक्रमं चैव तुलामानं शरीरजम् ।
प्रजार्थोद्देशविज्ञानं द्विप्योपक्रम (?) एव च ॥

. . . लक्षणं चैव वन्ध्यायाश्चाप्युपक्रमः ।
हेषितं चैव वाहानां बालप्रकिरणं तथा ॥
ज्वलितं चैव यात्रा च तथैवोत्पात . . . ।
मात्राज्ञानं तथा योगाः शोभा सूकरधाविकम् ॥
कयाश्वपरिवेधाश्वस्वार्तासम्पातिकस्तथा ।
उत्तमं सप्तमं . . . . सम्परिकीर्तितम् ॥

**Colophon:**

इति गणकृते सिद्धयोगसङ्ग्रहे शास्त्रसङ्ग्रहाध्यायः ॥

प्रणिपत्य धवलतनुमघतिमिरहरं गोपतिं सशशाङ्कं च ।
अश्वायुर्वेदनिधिं महामतिं शालिहोत्रं च ॥
ये शालिहोत्रसुश्रुतगर्गैः . . . महर्षिभिः पुरा कथिताः ।
स्वे स्वे तुरङ्गशास्त्रे योगाश्चान्ते विकाराणाम् ॥
तेषां मध्ये राजन् सारतरं हयहितार्थमुद्धृत्य ।
रचितस्त्वयं समासेन सङ्ग्रहः सिद्धयोगानाम् ॥
धर्मार्थकामसिद्धिर्यथा तुरङ्गैर्भवेत्तथा पूर्वम् ।
कथितं च महामुनिभिः ततोऽपि वक्ष्ये समुद्देशम् ॥
अश्वैर्हस्तगता पृथ्व (पृथ्वी) श्रीरश्वैर्विपुलं यशः ।
विजयश्च भवेदश्वैरश्वैर्हर्म्यादिभूषणम् ॥

* * * *

**Colophon:**

इत्यश्वायुर्वेदे गणकृते सिद्धसङ्ग्रहे षट्सहस्रसंहितायां प्रथमोऽध्यायः ॥

**End:**

कृष्णा अष्टमवर्षाणि हरिण्येकादश स्मृतः ।
मक्षिका विंशतिश्चैव त्रयोविंशतिशङ्खजः ॥
षड्विंशतिउद्धलश्च चलनं नवविंशतिः ।
वितनव्यञ्जनं प्रोक्तं द्वात्रिंशत्परमायुषः ॥

इति वयोज्ञानम्.

**Colophon:**

मावे तु कन्यास्थितभास्करे च शुक्ले नवम्यां भृगुवासरे च ।
अश्वस्य शास्त्रं व्यलिखत् नृसिंहः प्रमोर्गणानामधिपस्य तुष्ट्यै ॥

## No. 13320. अश्वायुर्वेदः, कर्णाटकटीकासहितः.
## AŚVĀYURVĒDAḤ WITH KANARESE MEANING.

Substance, palm-leaf. Size, 9⅞ × 1⅜ inches. Pages, 56. Lines, 4 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Aśvalakṣaṇa (Kanarese) 29*a*, Aśvacikitsā (Kanarese) 33*a*.

Wants the beginning and the end in the Lakṣaṇasthāna.

Same work as the above.

---

## No. 13321. अश्वायुर्वेदः.
## AŚVĀYURVĒDAḤ.

Pages, 320. Lines, 17 on a page.

Begins on fol. 17*a* of the MS. described under No. 13317.

This is the first of the three volumes in which the work is written, the other two being described under the next two numbers. The work is apparently not complete in three volumes. This treatise in Aśvaśāstra appears to be a compilation from various previously existing works dealing with the origin, characteristics and the treatment of diseases, etc., of horses. There is a commentary for the third stanza only.

Volume I contains—

लक्षणस्थान—
- आवर्ताध्याय.
- वर्णपुष्पपुण्ड्राध्याय.
- सत्त्वाध्याय.
- गतिभारयोजनप्रमाणलक्षणाध्याय.
- शरीरलक्षणाध्याय.
- सर्वाङ्गलक्षणाध्याय.
- भद्रमन्द्रमृगराजादिलक्षणाध्याय.
- अन्धादिसप्तदोषलक्षणाध्याय.
- विकृताविकृतलक्षणाध्याय.
- शोभालक्षणाध्याय.
- कुलाध्याय.
- देशभेदचिकित्सननिरूपणाध्याय.
- अभिषेकविधानाध्याय.
- महादोषाध्याय.
- हेषितलक्षणाध्याय.
- शान्तिप्रकरण.
- बालप्रकरणज्वलनधूमोल्कोत्पातयात्रालक्षणाध्याय.
- वयोऽवस्थाज्ञानाध्याय.
- क्षेत्रदशाध्याय.
- क्रयविक्रयाध्याय.
- प्रदेशाध्याय.
- स्थानसंस्थानावर्तनिरूपणाध्याय.
- अष्टादशवर्णभेदनिरूपणाध्याय.
- घृतपानाध्याय.

Volume II contains—

उत्तरस्थान—

अग्निवर्णाध्याय.

शालासोपस्कविच्छिन्नाध्याय.

सिद्धिस्थान—

प्रतिपानविध्यध्याय.

क्षारविधिनिरूपणाध्याय.

दाहाध्याय.

शस्त्रव्यापादनाध्याय.

बस्तिचिकित्साध्याय.

आस्थापनविध्यध्याय.

त्रिवृतनिरूपणाध्याय.

स्वेदोपचाराध्याय.

स्नेहगुणाध्याय.

घृतपानाध्याय.

चतुर्दशग्रहोक्तचिकित्साध्याय.

मृदुग्रहाध्याय.

सुरासवाध्याय.

लवणव्यापनाध्याय.

धान्यगुणाध्याय.

क्षीरगुणाध्याय.

नाडीव्यापदध्याय.

धूमपानाध्याय.

रहस्यस्थान—

रेखानिर्माणाध्याय.

उत्तरस्थान—

सूत्रसङ्ग्रहाध्याय.

आदिसूत्राध्याय.

महाप्रश्नाध्याय.

अण्डसम्भवाध्याय.

त्रिविधरोगविज्ञानीयाध्याय.

दुर्मनोज्ञानाध्याय.

वर्तातिसाराध्याय.

रहस्यस्थान—

सुभिक्षावर्ताध्याय.

रूक्षावर्ताध्याय.

उत्तरस्थान—

मूत्रग्रहाध्याय.

मृगावर्ताध्याय.

शुद्धावर्ताध्याय.

वातोदरदोषाध्याय.

स्नेहावर्ताध्याय.

दशावर्ताध्याय.

प्रस्कन्नाध्याय.

तललिङ्गाध्याय.

कूर्चलिङ्गाध्याय.

अध्यस्थलिङ्गाध्याय.

जान्वादिलिङ्गिताध्याय.

अंसलिङ्गिताध्याय.

त्रिकलिङ्गिताध्याय.

विंशतिलिङ्गिताध्याय.

अनुप्रसन्नाध्याय.

षड्तुकफलगुणवर्णाध्याय.

पादकर्मनिरूपणाध्याय.

अभितापवर्णनाध्याय.

हिक्काचिकित्साध्याय.

श्वासचिकित्साध्याय.

ज्वराध्याय.

सिद्धिस्थान—

गर्भोत्पत्तिवर्णनाध्याय.

उत्तरे तृतीयस्थाने—

शरीरनिश्चयाध्याय.

शरीरे तृतीयस्थान—

कायोत्पत्त्यध्याय.

Volume III contains—

सिद्धिस्थान—

शरीरदेशप्रमाणाध्याय.

हीनातिरिक्ताध्याय.

आध्यात्मिकस्थान.

भूताद्युत्पत्तिस्थान—

नवाश्वविभागाध्याय.

शारीरस्थान—

आध्यात्मिकाध्याय.

सिद्धिस्थान—

कार्याकार्याध्याय.

शालाविधिपटल.

यवसपानविधिपटल.

धान्यगुणनिर्वचनपटल.

शारीरस्थान—

अन्नपानाध्याय.

अधिकारचिकित्सितपटल.

सिद्धिस्थानशारीर—

अधिकारचिकित्सितपटल.

शारीरस्थान—

जङ्घादिलक्षणाध्याय.

रसस्कन्धाध्याय.

शारीरस्थान—

पञ्चसरसाध्याय.

क्षयथ्वध्याय.

द्विव्रणीयोगाध्याय.

मूढगर्भचिकित्सनाध्याय.

शल्यनिर्हरणाध्याय.

व्रणाष्टशल्यहरणाध्याय.

**Beginning:**

नमामि धन्वन्तरिमादिदेवं सुरासुरैर्वन्दितपादपद्मम् ।
लोके जरारुग्भयमृत्युनाशनं दातारमीशं विविधौषधीनाम् ॥
शङ्खं चक्रमुपर्युदस्तश(क)रयोः दिव्यौषधं दक्षिणे
वामेनान्यकरेण सम्भृतसुधां तोडीजलूकावलीम् ।
बिभ्राणः करुणाकरः सुखकरः सर्वामयध्वंसकः
सर्वं मे दुरितं चि(भि)नत्तु भगवान् धन्वन्तरिः सन्ततम् ॥
श्रियंदेवं वन्दे सततशुभसम्भाविफलदां
यतः कान्ता जाता जितपवनवेगा हरिवराः ।

श्रियं लीलाकृष्णा(ष्टा)मपि च बलिनः सर्गपतये
दर्दुर्येना(ऽमी)मूयः प्रवरगुणगम्भीरगुरवः ॥

अत्र श्रियं लक्ष्मीं वन्द इति क्रियाकारकयोजना । वन्द इति उत्तमपुरुषप्रयोगादेवाहमिति लभ्यते । वदि अभिवादनस्तुत्योरिति धातोः तस्य स्तुतिरपि कर्तव्येत्यर्थः । ननु विशिष्टाधिकृता हि देवता वन्दनीया भवति ।

यतः कान्ता जाता इत्यनेन मनोहरतुरङ्गमाः तस्याः सकाशात्सम्भूताः । तथा चोक्तम्—

पुरा कृतयुगस्यादौ यजतः परमेष्ठिनः ।
दृशोस्तु धूमावृतयोरापतन्नस्त्रबिन्दवः ॥
ताम्पाणिपल्लवे लक्ष्मीर्दधाराशु हयास्तदा ।
जातास्ततस्ते तुरगाः सर्वलक्षणलक्षिताः ॥

* * * *

येषाम्यधात्सद्गुणिनो हि वाहिनिबन्धबुद्ध्यामरदानवानाम् ।
सर्वार्थदांस्तानधिकृत्य भानुरस्थानदुस्थः किमभूदनन्ते ॥
असमसमरवैनश्रीविलासैकवासः
कृतदितिसुतस(ङ्गः) प्राप्य दिव्याश्वरत्नम् ।
निबिडयति बिडौजाः केवलं त्यक्तचित्तः
रहसि च सह शच्या शश्वदालिङ्गनानि ॥
ये वास्तोष्पतिसम्पदं मखमुखे गत्वा सु(स्व) भूभुजा-
माजौ सद्विजयं परश्रियमवस्कन्धेव मन्ये मुदम् ।
सत्कीर्तिं वितरन्ति कार्तिकसुधाज्योतिर्द्युतिद्योतिनी
दिव्यस्त्वं तुरगा यदिष्टमिह तां किं किं (हि) तैः प्राप्यते ॥
स्मृत्वा विभो रूपगतं हयानां तत्प्रेरिताज्वलनशास्त्रमुखं विशन्ति ।
पूर्वोक्तितन्त्रा(न्त्र)कलनाकलितं हि तेषामाचक्ष्महे जननलक्षणमल्पमादौ ॥
कालभेदेन वाहानां चत्वारः सम्भवा मताः ।
द्विविधं सम्भवं केचित्सप्त चाष्ट तथापरे ॥
अग्निवाय्वाण्डपीयूषत्रिदशाशनिसामतः ।
गर्भादष्टविधोत्पत्तिरश्वानां परिकीर्तिता ॥

* * * *

बह्वन्नभक्षी क्षणदाप्रद्वेषी क्षुद्रो हरिच्छिद्रविघातकारी ।
पिशाचसत्त्वस्तुरगो हि शूद्रवासप्रियः क्रूरकुरूपभीरुः ॥

**Colophon:**

इति हयायुर्वेदलक्षणस्थाने सत्त्वाध्यायः ॥

* * * *

मतान्तरे अर्धमात्राप्रमाणम्—

योजनानि दशायाति दिनैकेन हयोत्तमः ।
मध्यमाष्टौ समायाति षट्सु याति न दुःखितः ॥

**Colophon :**

इत्यश्वायुर्वेदे शालिहोत्रे लक्षणस्थाने गतिभारयोजनप्रमाणलक्षणाध्यायः ॥

See under No. 13323 sequent for the end.

---

No. **13322.** अश्वायुर्वेदः.

ASVAYURVEDAH.

Substance, paper. Size, 11¼ × 8¾ inches. Pages, 344. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

This is the second of the three volumes referred to under the previous number, wherein see for contents.

Same work as the above.

---

No. **13323.** अश्वायुर्वेदः.

ASVAYURVEDAH.

Substance, paper. Size, 12¼ × 9¾ inches. Pages, 156. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

This is the third of the three volumes referred to under No. 13321 ante, wherein see for contents.

Same work as the above.

See under No. 13321 for the beginning.

**End:**

यस्य नासास्यतोऽङ्गुल्यौ योषिण्या चापि दूरगम् ।
प्रणष्टं यश्च कालेषु तच्छल्यं व्यञ्जने हितम् ॥
तत्पाचयित्वा कालेन मार्गोपन्नं विनिर्दिशेत् ।
व्रणशल्य(स्य)मीमांसा यथावत्परिकीर्तिता ॥

**Colophon :**

इत्यश्वायुर्वेदे शालिहोत्रीये शारीरे तृतीयस्थाने व्रणाष्टशल्यहरणं नामाष्टदशोऽध्यायः समाप्तः ॥

सङ्ग्रामजातशल्यविघातक्षतशमनविधिरुच्यते—

सुश्रुत उवाच—

सर्ववेदान्तविदुषं तपस्वी वाग्विदां वरम् ।
शालिहोत्रमृषिश्रेष्ठं गान्धाराराष्ट्रनैषधाः ॥

* * * *

वयमश्वहितार्थाय भवन्तं शरणं गताः ।
ततोऽब्रवीच्छालिहोत्रः सुश्रुताय महामुनिः ॥

* * * *

अश्वानां नेत्राञ्जनानि—

तिनसीपिप्पलीचारुमरीचीबारहरीतकीबीजसुबीजम् ।
आमलकारसघट्टनघट्टनयोजदृष्टिसीनसमानम् ॥
महादोषमदावर्तानामग्निचिकित्साविधिरुच्यते ।

---

No. **13324.** मातङ्गलीला.

MĀTAṄGALĪLĀ.

Pages, 67. Lines, 10 on a page.

Begins on fol. 43*a* of the MS. described under No. 13031.

Breaks off in the 11th Adhikara.

An elementary treatise in 12 chapters as detailed below, dealing with the origin and characteristics of elephants, the duration of their life, their prices, and the operations for catching them, etc. The work has been printed in the Trivandrum Sanskrit Series, wherein the authorship of the work is attributed to Nīlakaṇṭha :—

१. नागोत्पत्तिः.
२. शुभलक्षणम्.
३. अशुभलक्षणम्.
४. आयुर्लक्षणम्.
५. वयोलक्षणम्.
६. माननिर्णयः.
७. मूल्याविकारः.
८. सत्त्वलक्षणम्.
९. मदभेदः.
१०. गजग्रहः.
११. गजरक्षणदिनर्तुचर्या.
१२. आधोरणगुणादि.

**Beginning:**

नृसिंहयादवौ दैत्यसमूहोग्राटवीदवौ ।
राजमानौ भजे राजराजमङ्गलवासिनौ ॥
मातङ्गवक्त्रं प्रणिपत्य दृष्ट्वा मातङ्गशास्त्रं मुनिपुङ्गवोक्तम् ।
मातङ्गलीलाचलितान्तरात्मा मातङ्गलीलां रचयामि तावत् ॥
उत्पत्तिः शुभलक्षणान्यशुभलक्ष्मायुर्वयोलक्षणं
मानं मूल्यविशेषसत्त्वमदभेदाश्च क्रमाद्दन्तिनाम् ।
वन्यानां ग्रहणं च लक्षणविधिस्त्वाचारभेदादिकं
नागाध्यक्षगुणादिकं च सकलं सङ्क्षेपतो वक्ष्यते ॥

आसीदङ्गाधिराजः सुरपतिसदृशो विश्रुतो रोमपादो
गङ्गातीरे कदाचित्परिजनसहितः सोऽथ पम्पानगर्याम् ।
आसीनो रत्नपीठे विपिनगजकृतं सर्वसस्यादिनाशं
कैश्चिद्विज्ञापितोऽचिन्तयदवनिपतिः किं नु कार्यं मयेति ॥
कालेऽस्मिन् गौतमो नारदभृगुमृगचर्माग्निवेश्यारिमेदाः
काप्यो मातङ्गचर्यादय ऋषिवृषभा देवतानां नियोगात् ।
पम्पां प्राप्ता नृपेणासनकुसुमजलाद्यैः समाराधितास्ते
वन्यान्नागान् ग्रहीतुं प्रददुरथ वरं नारदादङ्गपाय ॥

* * * *

शुश्रूषार्थं च कृत्वा मुनिरथ जनकस्याश्रमात्पालकाप्यं
तं देशं प्राप्य यत्र स्थितमपि गजयूथं त्त(च)तस्मिन्नदृष्ट्वा ।
सर्वत्रान्विष्य पम्पां मुनिरथ गतवान् स्नेहतो व्याकुलात्मा
नागानां दुःखितानां व्रणशमनचिकित्सादिरक्षां चकार ॥
कश्चिन्नातिचिराद्भविष्यति मुनिर्मातङ्गबन्धुः परम्
आयुर्वेदपरायणोऽतिनिपुणो व्याधीन् हरिष्यत्यसौ ।
इत्युक्त्वा दिगनेकपाश्च विधिना याता यथास्वं दिशं
दिग्मातङ्गकुलोद्भवाश्च पृथिवीं याताः परे शाव(प)तः ॥

See under the next number for the end.

---

No. 13325. मातङ्गलीला, केरलटीकासहिता.

## MĀTAṄGALĪLĀ WITH MALAYĀLAM MEANING.

Substance, paper. Size, 11⅜ × 8⅜ inches. Pages, 48. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in the 11th Adhikāra.

Same work as the above.

See under the previous number for the beginning.

End:

गर्तं हस्तचतुष्कनिर्व(म्न)करयुगा(म्म)व्यासदोःपञ्चका-
यामं वेणुदलैः कटैश्च विहितं हत्वा मृदाच्छाद्य कं(तम्) ।
तस्मिन्सद्यपरिस्तृते तु कलभानापातयित्वा भटा
बध्नीयुः सुदृढं गजग्रह इति प्रोक्तोऽवपाताह्वयः ॥

**Colophon:**

इति गजग्रहाविकारो दशमः ॥

वन्यास्तत्र सुखोषिता विविवशाद्ग्रामावतीर्णा गजा
बन्ध(द्धा)स्तीक्ष्णकटुग्रवाग्भिरतिशुग्भीमोहवन्धादिभिः
उद्विग्नाश्च मनश्शरीरजनितैर्दुःखैरतीवा(क्षमाः)
प्राणान्धारयितुं चिरं नरवशं प्राप्ताः स्वयूथादथ ॥

बालातपः शशिकलारुचिरश्च शाली-
गोधूमधान्यमपि यत् क्रिमिभिर्न दुष्टम् ।
स्विन्नैरमीभिरुपकल्पित(क्लृप्त)मनल्पमांसं
भोज्यं गजस्य विनियोज्यमिदा(भा)गमज्ञैः ॥

---

No. 13326. मातङ्गलीला, केरलटीकासहिता.

MATAṄGALĪLĀ WITH MALAYĀLAM MEANING.

Substance, palm-leaf (Śrītāla). Size, 9¼ × 1⅜ inches. Pages, 59. Lines, 10 on a page. Character, Malayāḷam. Condition, good. Appearance, old.

Breaks off in the 11th Adhikāra.

Same work as the above.

---

No. 13327. मानप्रियमतम्.

MĀNAPRIYAMATAM.

Pages, 29. Lines, 17 on a page.

Begins on fol. 26 of the MS. described under No. 13317.

Breaks off in the sixth Adhyāya.

A treatise on the characteristics of good and bad horses with hints for ascertaining their age, etc. The name of the author is not given.

Deals with the following topics :—

१. अश्वप्रकृतिलक्षण.
२. अश्वशरीरावयवप्रमाण.
३. अश्ववयोज्ञान.
४. अश्ववर्णनिरूपण.
५. मिश्रलक्षण.
६. अश्वावर्तादि.

**Beginning:**

अमृतात्पूषणाद्वह्नेः देवाध(द)ण्डाश्च(च)गर्भतः ।
साम्नो हयानामुत्पत्तिः सप्तधा परिकीर्तिता ॥

कृते युगेऽश्विजे मासि शुक्लेऽ(श)प्रतिपत्तिथौ ।
सोमवारेऽश्विनीऋक्षे ब्रह्मा लोकपितामहः ॥
मन्त्रकल्परहस्येन कृत्वा देयमतच्छुभाम् ।
वेदोक्तेनैव मार्गेण जुहुयादग्निदानतः ॥

**End:**

ये तेन चिरायुषा शुभकरा यत्नात्परीक्षा(क्ष्या)हयाः
गन्धान्मूत्रशकृन्मलेषु नवसु द्वारेषु कर्णेऽपि च ॥

**Colophon:**

इति मानमियमते अश्वशास्त्रे उत्स्मयस्थाने गन्धलक्षणं नाम पञ्चमोऽध्यायः ॥

तत्र प्रधाना ह्यावर्ता शुक्तिशुक्तिसमो भवेत् ।
वत्सजां स्वावलीढेव हशोह्यवलीढकम्(?) ॥
* * * *
अपानकोष्ठनाभीनां दुर्भरं शन्द्रमाण्डकः ।
शिवने मलजानां च सर्पाक्षः पति कुम्भकः(?) ॥

MEDICINE—SUPPLEMENT.

## No. 13328. अष्टाङ्गहृदयम्.

### AṢṬĀṄGAHṚDAYAM.

Substance, palm-leaf. Size, 14⅝ × 1¼ inches. Pages, 360. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Contains the Adhyāyas one to seven in the Nidānasthāna.

Same work as that described under No. 13072.

## No. 13329. अष्टाङ्गहृदयम्, आन्ध्रटीकासहितम्.

### AṢṬĀṄGAHṚDAYAM WITH TELUGU MEANING.

Pages, 10. Lines, 34 on a page.

Begins on fol. 103a of the MS. described under No. 13310.

Contains the 15th Adhyāya in the Sūtrasthāna.

Same work as the above

No. 13330. अष्टाङ्गहृदयम्, आन्ध्रटीकासहितम्.
ASṬĀṄGAHṚDAYAM WITH TELUGU MEANING.

Pages, 28. Lines, 8 on a page.

Begins on fol. 97*a* of the MS. described under No. 13224.
Breaks off in the Dinacaryādhyāya of the Sūtrasthāna.
Same work as the above.

---

No. 13331. अष्टाङ्गहृदयम्.
AṢṬĀṄGAHṚDAYAM

Pages, 15. Lines, 6 on a page.

Begins on fol. 32*a* of the MS. described under No. 13249.
Contains the first Adhyāya of the Cikitsāsthāna.
Same work as the above.

---

No. 13332. आयुर्वेदः.
ĀYURVĒDAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 4*b* of the MS. described under No. 13122.
Incomplete.
Same work as that described under No. 13086 ante.

---

No. 13333. आयुर्वेदः.
ĀYURVĒDAḤ

Pages, 6. Lines, 5 on a page.

Begins on fol. 59*b* of the MS. described under No. 13115.
Incomplete.
Same work as the above.

---

No. 13334. आयुर्वेदः, आन्ध्रटीकासहितः.
ĀYURVĒDAḤ WITH TELUGU MEANING.

Substance, paper. Size, 9¼ × 7⅜ inches. Pages, 18. Lines, 26 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Vaidyaviṣaya 9*b*, Nidānaviṣaya 24*b*.

Same work as that described under No. 13086 ante, wherein see for the beginning.

**End:**

अथातस्सम्प्रवक्ष्यामि सङ्क्षिप्तं सूक्तमुत्तमम् ।
आयुर्वेदोपदेशे स्मिन्नष्टधातुर्निगद्यते ॥

* * * *

सद्यः स्नानं च भुक्तस्य क्षुत्तृष्णातपशीलिता ।
व्यायामाक्रान्तभीतस्थो मूत्रवेगश्च रोदनम् ॥
सुन्दरीणां च संयोगे मद्यपानमतिभ्रमः ।
गान्धारीभक्षकश्चैव पवनाभ्याससाधकः ॥
अपस्मारभ्रान्तदेही नाडी सम्यङ्न विद्यते ।

---

No. 13335. औषधयोगग्रन्थ, आन्ध्रटीकासहितः.
AUSADHAYOGAGRANTHAH WITH TELUGU MEANING.

Pages, 28. Lines, 5 on a page.

Begins on fol. 35a of the MS. described under No. 13174.
Wants the beginning and the end.
Similar to the work described under No. 13110.

**Beginning:**

न्यग्रोधादिघृतम्—

न्यग्रोधपिप्पलसदाफललोध्रयुग्मं जम्बूद्वयार्जुनक . . मवल्काः ।
वृक्षाम्रवञ्जुलप्रियालुपलाशनन्दि काशिकभसरलामधुकं मधूकैः(?) ॥

* * * *

आदौ न प्रतिकर्तव्यं व्याधिदोषेण दुर्जयः ॥
मधूकपीठं सितया च युक्तं स्तन्येन नस्यं विनिहन्ति मूर्च्छाम् ।
स्तन्येन इक्षुस्वरसेन नस्यं न चन्दनेन विनिहन्ति मूर्च्छाम् ॥
कुङ्कुमं शर्करायुक्तं घृते वा पयसस्तथा ।
मूर्च्छामदविकारघ्नं वायुनोन्मादपस्यजित् ॥

**End:**

तालीसपत्रं गजकेसराणां लवङ्गत्वकक्षीरिकटुत्रयं च ।
भृङ्गं विलङ्गात्रिफला च क्षौद्रैरेतानि चूर्णानि समांशकानि ॥

* * * *

## No. 13336. क्षयरोगनिदानम्.
## KṢAYARŌGANIDĀNAM.

Pages, 9. Lines, 7 on a page.

Begins on fol. 93a of the MS. described under No. 13224. Incomplete.

Similar to the work described under No. 13188 ante.

**Beginning :**

क्षयरोगनिदानम्—

क्षयरोगज्वरो राजा तस्य पत्नी च कामिला ।
चमूपतिः पाण्डुरोगी(गः) रक्तपित्तं तु पुत्रिका ॥
सखा शोफातिसारं च मन्त्रिणः श्वासकासकाः ॥

* * * *

निदानम्—

वातपित्तकफं चैव वातश्लेष्मक्षयानि च ।
वातपित्तक्षयं नाम पित्तश्लेष्मक्षयानि च ॥

* * * *

विविधा विंशतिर्नाम क्षयरोगश्च दारुणः ॥

**End :**

धात्रीखर्जूरद्राक्षा च मरिचं चणकानि च ।
शिग्रुशाकं च मत्साक्षी शोकिनी शाकलुङ्गकम् ॥
चक्रवर्ति मेघनादं शोफघ्नी चाम्रकानि च ।
एतानि पथ्यमाप्नोति विंशतिक्षयरोगजित् ॥

---

## No. 13337. गन्धककल्पः.
## GANDHAKAKALPAḤ.

Substance, paper. Size, 6¾ × 4¾ inches. Pages, 12. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 8a. The other work herein is Viṣavaidya 1a. Complete.

On the medicinal properties of sulphur and on details connected with the preparation of medicines from it.

**Beginning:**

गन्धकोत्पत्तिः—

गन्धकस्यापि माहात्म्यं तद्रुक्षं वद मे प्रभो ।

ईश्वर उवाच—

श्वेतद्वीपे पुरा देवि सर्वरत्नविभूषिते ।
सर्वकाममये रम्ये तीरे क्षीरपयोनिधौ(धेः) ॥

* * * *

क्षीराब्धिमथने चैव अमृतेन सहोदितम् ।
निजगन्धेन सर्वाणि हर्षयन् सर्वदानवान् ॥
ततो देवगणैर्युक्तं गन्धकाख्यो भवेत् स्वयम् ।
योगस्ते पारदप्रोक्तं ते चैवात्रामवन्निति ॥
इति देवगणैः प्रीतिः पुरा प्रोक्ता सुरेश्वरि ।
तेनेमं गन्धकं नाम विख्यातः क्षितिमण्डले ॥

* * * *

मृतं गन्धकमादाय भाव्यं च तथैव च ।
. . . . . . . . . . . . . तथैव च भगन्धरम् ॥
येन सर्वप्राणिरोगास्त्वग्दोषाजनितस्तथा ।
नश्यन्ति वेदनाः सर्वे गन्धकस्य प्रसाधितम् ॥
षण्मासिकप्रयोगेण शृणु वक्ष्यामि तत्फलम् ॥
हंसवर्णेन केशाश्च भवन्त्यलिसमप्रभाः ।
व्रणवातं च गुल्मं च कफवातं च कण्डुताम् ॥

**End:**

तदुपरियन्तरकाश्यापात्रे निहितं सर्वक्रिमिनाशं च ।
वातपैत्त्यकफरोगविनाशं तन्नामेवागन्धकसारम्(?) ॥

इति धन्वन्तरिमुखोद्भववाक्यम् ।

शुद्धगन्धं हरेद्रोगान् कृष्णो मृत्युजरापहः ।
भूतशोफानिलश्लेष्म वीर्यवृद्धिं करोति च ॥
ब्राह्मणः सर्वलोहघ्नः क्षत्रियो धातुवादकृत् ।
रसे रसायने वैश्यः शूद्रो जन्मजरापहा ॥

## No. 13338. चिकित्सातिलकम्.
## CIKITSATILAKAM.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 92. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Breaks off in the Sūtrasthāna

Same work as that described under R. No. 373(b) of the Triennial Catalogue of MSS., Vol. I, Part I-B. By Śrīnivāsārya, son of Raghunātha, grandson of Aijanāgārya of Kauśikagōtra and belonging to the Árvāla family.

---

## No 13339. चूर्णलेह्यक्रमः.
## CŪRṆALEHYAKRAMAḤ.

Pages, 17. Lines, 5 on a page.

Begins on fol. 38a of the MS. described under No. 13083.

Incomplete.

Gives the preparation of certain medicinal powders and electuaries, with a statement of the ailments cured by them.

**Beginning :**

अश्वगन्धा जटामांसी प्रियङ्गुमधुयष्टिका ।
मुस्ता धात्रीद्वयं द्राक्षा कुङ्कुमं दाडिमीफलम् ॥
तगरं मुसली जाजी जीरकं मरिचं तथा ।
खर्जूरं च शिलादारु कोष्ठं नीलोत्पलानि च ॥

* * * *

अश्वगन्धादिचूर्णेन सर्वव्याधिनिवारणम् ॥

* * * *

शतावरीमूलकल्कं कृत्वा क्षीरं चतुर्गुणम् ।
क्षीरं पादघृतं गव्यं घृतशेषं विपाचयेत् ॥
गुडेन शितया वाथ पलार्धं लेहयेत्सदा ।
असृक्पैत्त्यं वातपैत्त्यं मूर्च्छाश्वासं च नाशयेत् ॥

**End :**

कूश्माण्डरसायनम्—

पीतत्वगतिकूश्माण्डं यूना चुल्यां पुनः पचेत् ।
घटयेत्सर्पिषः प्रस्थे क्षौद्रवर्णेऽत्र च क्षिपेत् ॥

## No. 13340. जीर्णकालप्रमाणम्, आन्ध्रटीकासहितम्.
## JĪRṆAKĀLAPRAMĀṆAM WITH TELUGU MEANING.

Pages, 7. Lines, 6 on a page.

Begins on fol. 7*b* of the MS. described under No. 13188.

Incomplete.

On the duration of time required for digesting different substances.

**Beginning :**

रसं सप्तघटीजीर्णं लेहतां पञ्चमीघटी ।
अष्टमं स्वरसं जीर्णं कषायं च चतुर्थकम् ॥
कल्कं चूर्णं च घटिका घटिकाद्वयमेव च ।
शीताम्बु जीर्यते याममुष्णाम्बु घटिकात्रयम् ॥
पिष्टं दशघटी जीर्णं क्षीरं जीर्णं त्रयोदश ॥

**End :**

कासीसं कृष्णनागं क्षितिधररुधिरं नीलघ्रं सुकान्तं
हेमाङ्गं भूमिसारं सलिलरिपुदलं हेमपुष्पारिबिजम् ।
गोरेस्वाशातिमेधाक्षितिबलसहितं रोहिणी चाक्षमिश्रं
सर्वं सव्येक्षतोयैः कविविजयफलैर्मोदकानक्षमात्रान् ॥
कुर्याच्चक्रेण पेयं क्षपयति निखिलं मूत्रणी . . . . .

---

## No. 13341. नाडीचक्रविधिः.
## NĀḌĪCAKRAVIDHIḤ.

Pages, 11. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No. 13231.

Incomplete.

Gives some particulars regarding the blood-vessels in the human body, such as their number, the position of the important ones among them, etc.

**Beginning :**

अथातः संप्रवक्ष्यामि नाडीचक्रमनुत्तमम् ।
श्रद्धया मम भक्त्या च वि(द्धि)वाचस्पतेऽधुना ।
शरीरं तावदेवं स्यात् षण्णवत्यङ्गुलात्मकम् ।
मनुष्या(णां) मुनिश्रेष्ठ स्वाङ्गुलीभिरिति . . . ॥

* * * *

कुन्दमध्यास्थिता नाडी सुषुम्णा सुप्रतिष्ठिता ।
तिष्ठ(न्ति)परितस्तस्या नाड्यो मुनिसत्तम ॥

द्विसप्ततिसहस्राणि तासां मुख्याश्चतुर्दश ।
सुषुम्णा पिङ्गला तद्वदिडा चैव सरस्वती ॥

* * *

**Colophon:**

इत्यादिनाडीचक्रविधिर्नाम एकादशोऽध्यायः ॥

**End:**

सहसा यो विमु योचो? विचक्षुर्न स जीवति ।
स्वरस्वरूपो लाभो वा हानिं च बलनिर्णयः ॥
रोगस्य.

---

No. 13342. नाडीविज्ञानम्, आन्ध्रटीकासहितम्.
NĀḌĪVIJÑĀNAM WITH TELUGU MEANING.

Pages, 19. Lines, 7 on a page.

Begins on fol. 65b of the MS. described under No. 13224.

Incomplete.

See in the work described under No. 13154 for the beginning

**End:**

प्रातः श्लेष्मवती नाडी मध्याह्ने चातिपित्तगा ।
अपरावातकं ज्ञेयं सन्निपाते विलक्षणा ॥

* * * *

---

No. 13343. नाडीशास्त्रम्.
NĀḌĪŚĀSTRAM.

Pages, 7. Lines, 5 on a page.

Begins on fol. 25a of the MS. described under No. 13083.

Complete.

A treatise bearing on the science of feeling the pulse.

Name of the scribe: Śeṣayya, son of Sōlē Muttayyan. Date of transcription: 26th of Paṅguni in the year Rudhirōdgāri.

**Beginning:**

नाडीशास्त्रं प्रवक्ष्यामि सर्वं विस्तारसांप्रतम् ।
शारीरमूलमाधारं वातमाश्रित्य देहिनाम् ॥
आदौ वातं मध्यपित्तमन्त्यश्लेष्मं प्रवर्तते ।
मायूरगजहंसकुक्कुटगतिं गम्यं स्थिरं वातजं
मण्डूकपिककालावुकगतिं पित्तस्य ह्यं गतम् ।
कूर्मसर्पजलूकजलचरगतिं श्लेष्मं महन्निश्रितम् ॥

End:

गतौ मन्दा तथा सूक्ष्मा त्रिभेदं नाडिलक्षणम् ।
सततं नाडिरूपेण रोगकालं भविष्यति ॥

* * * *

रक्तमामातिसारं च सरुजं प्रतिमेहनम् ।
दाडिमद्रि(मादि)प्रयोगोऽयमतिसारकुठारकः ॥

Colophon:

नाडीकालं सम्पूर्णम् ॥

---

No. 13344. निदानविषयः.

NIDĀNAVIṢAYAḤ.

Pages, 23. Lines, 10 on a page.

Begins on fol. 29*a* of the MS. described under No. 13247.

Contains the first Ullāsa only.

Same work as that described under No. 13166, wherein see for the beginning

End:

वृद्धानामतिसारिणां ग्रहणिनां निर्वीर्यहृद्रोगिणां
बालानामपि गर्भिणीक्षयरुजां संवर्जयेल्लङ्घनम् ।
पूर्वं रोगनिदानमत्र नितरां ज्ञात्वा चिकित्साक्रियां
कुर्यात्कालवयोऽतिरेकमतिमान् प्रत्यक्षधन्वन्तरिः ॥

* * * *

आयुर्वेददवाहटप्रमुखशास्त्रार्थेषु दक्षं शुचिं
सद्वंश्यं गतमत्सरामृतकरं सत्योक्तिमल्पोत्सुकम् ।
शान्तं कान्ततनुं युवानमरुजं वैद्यं चिकित्साकरं
विश्वासोपगतं समीक्ष्य विपदो गच्छन्ति तद्दर्शनात् ॥

Colophon:

इति निदाने प्रथमोल्लासः ॥

* * * *

धर्मिष्ठः सत्यवान् विद्वान् देवपूजापरायणः ।
सदयः पद्महस्तश्च स योग्यो रसवैद्यके ॥

---

No. 13345. निदानविषयः, आन्ध्रटीकासहितः.

NIDĀNAVIṢAYAḤ WITH TELUGU MEANING.

Pages, 23. Lines, 28 on a page.

Begins on fol. 24*b* of the MS. described under No. 18334.

On the diagnosis of diseases and on their treatment.

**Beginning:**

भिषक् तु भेषजं वारि स्वायत्तं लिङ्गने शुचिः ।
सिद्धसौख्यं धृते रेखा शरीरं नोद्विग्नं भवेत् ॥
